
Brihad jatakam

बृहज्जातकम्



9/8

~~२१०९~~

1109

126

11

१ ०॥श्रीगणेशायनमः॥ ॥श्रीवेंकटेशायनमः॥ ॥श्रीशारदा
गुरुभ्योनमः॥ ॥श्रीमार्तंडभैरवायनमः॥ ॥श्रीमहालक्ष्म्यै
नमः॥ ॥श्रीसांबशिवायनमः॥ ॥श्रीरेणुकायनमः॥ ॥
श्री॥ ॥समस्तहोराशास्त्रप्रवर्तकपुरातनाचार्येभ्योनमः
॥ ॥श्रीनारायणायनमः॥ ॥श्रीनृसिंहायनमः॥ ॥

॥श्री॥ ॥श्री ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री १

०॥श्रीगणपतयेनमः॥ ॥ब्रह्माजशंकररवींदुकुजज्ञजीवशुक्रा
र्कपुत्रगणनाथगुरून्प्रणम्या॥ यःसंग्रहोर्ककरलाभविरुद्धबुद्धेरावं
तिकस्यतमहंविवृणोमिसूक्ष्मं॥१॥ यच्छास्त्रंसविताचकारविपुलैः
स्कंधैःस्त्रिभिर्ज्योतिषंतस्यास्थितिभयात्पुनः कलियुगेसंश्रित्य
योभूतलं॥ भूयःस्वल्पतरंवराहमिहिरव्याजेनसर्वंव्यधादित्थंयं
प्रवदंतिमोक्षकुशलास्तस्मैनमोभास्वते॥२॥ वराहमिहिरोदधौसु
बहुभेदततोयाकुलेग्रहर्क्षगणयादसिप्रचुरयोगरत्नोज्वले॥
भ्रमंतिपरितोप्लवाल्लघुधियोर्थलुब्ध्यास्तवकरोमिवृत्तिंप्लवं
निजधियाऽमत्रोत्पलः॥३॥ ॥इहशास्त्रेकानिसंबंधाभिधे
यप्रयोजनानिभवंतीत्युच्यंते॥ वाच्यवाचकलक्षणसंबंधः॥

वाच्यार्थो वाचकः शब्दः ॥ अथवोपायोपेयंलक्षणसंबंधः ॥ उपायस्त्वि
दंशास्त्रमुपेयज्ञानं ॥ अथ च ॥ आब्रह्मादिविनिसृतवेदांगमिति संबं
धः ॥ राशिस्वरूपंहोराद्रेक्काणनवांशद्वादशांशत्रिंशांशभागपरिज्ञानंग्र
हस्वरूपंग्रहराशिबलाबलंवियोनिजन्माधानपरिज्ञानंजन्मकाल
विस्मापनप्रभावकथनमायुर्दायदशांतर्दशाष्टकवर्गकर्मजीवरा
जयोगचंद्रयोगनाभसयोगद्विग्रहादियोगप्रव्रज्याराशिफलदृष्टि
फलभावफलाश्रयफल प्रकीर्णानिष्टयोगस्त्रीजातकनिर्याणनष्ट
जातकद्रेक्काणगुणस्वरूपमभिधेयंलोकानांप्राक्कर्मविपाकव्यं
जकत्वंप्रयोजनंप्रयोजनंसत्याशुभाशुभकथनादिहलोकपरलो
कसिद्धिरितित्वाप्रयोज्यं ॥ किमेभिरुक्तैरित्यत्रोच्यते ॥ यस्मात्त्व=

णं संबंधाभिधेयप्रयोजनकथनाच्छास्त्रविषये श्रद्धा जायत इति ॥
तथा चोक्तमाचार्यैः ॥ सिद्धिः श्रोतृप्रवृत्तीनां संबंधः कथनाद्यतः ॥ त
स्मात्सर्वेषु शास्त्रेषु संबंधः पूर्वमुच्यते ॥ किमेवात्राभिधेयं स्यादि
ति पृष्टः केनचित् ॥ यदि न प्रोच्यते तस्मै फलं शून्यं तु तद्भवेत् ॥ स
र्वस्यैव हि शास्त्रस्य कर्मणो वाथ कस्यचित् ॥ यावत्प्रयोजनं नोक्तं ता
वत्केन न गृह्यते इति कस्यास्मिन्शास्त्रेऽधिकार इत्येषु त्युच्यते ॥ द्वि
जस्यैव यतस्तेन षडंगो वेदोऽध्येतव्यो ज्ञातव्यश्च ॥ कान्यंगानीत्युच्य
ते ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ॥ छंदसां लक्ष
णं चैव षडंगो वेद उच्यते इति सतामयमाचारो यच्छास्त्रप्रारंभेऽभीष्टा
भिमतदेवताप्रसादात्तत्र नमस्कारेण तस्य सा वा तद्भक्तिर्विरो

षेणवाभिप्रेतार्थसिद्धिं वांछंति॥ तदयमावंतिकाचार्यवराहमिहि
रोमगधद्विजोकीन्तुब्धावरप्रसादोज्योतिःशास्त्रेसंग्रहहतद्गणि
तस्कंधादनंतरं होरास्कंधं चिकीर्षुरशेषविघ्नोपशांतये भगवतः
सूर्यादात्मगामिनीं वाकूसिद्धिं शार्दूलविक्रीडितेनाह॥ ॥मू
र्त्तित्वेपरिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनामात्मेत्यात्मविदां
क्रतुश्च यजतां भर्त्तामरज्योतिषां॥ लोकानां प्रलयोद्भवस्थितिवि
भुश्चानेकधा यः श्रुतो वाचं नः सददात्वनेककिरणःस्त्रैलोक्यदी
पोरविः॥१॥ ॥सरविः भगवानादित्यः अस्माकं वाचं गिरं द
दातु प्रयच्छतु कीदृशोरविरनेककिरणः प्रभूततरश्मिः सहस्ररश्मि
रित्यर्थः॥ त्रैलोक्यदीपः स्त्रैलोक्यं भूर्भुवस्वरादित्रयं तत्र दीपः।

टीका

वृ० तइतिसाधुपाठः॥तथापुनर्जन्मनां।नपुनर्जन्मएषांतेअपुनर्जन्मा
३ नः।मुक्तास्तेषांवर्त्ममार्गः॥मोक्षद्वारमित्यर्थः॥यतोद्विविधोमा
र्गः।देवयानाख्यःपितृयानाख्यश्च।तत्रपितृमानमार्गश्चंद्रमाः
येनस्वर्गगामिनःस्वर्गंगच्छंति॥मोक्षद्वारंसूर्यः।यतःसूर्यमंडलं
भित्वामोक्षभाजोगच्छंति॥तथाचभगवान्व्यासः॥स्वर्गद्वारं
प्रजाद्वारंमोक्षद्वारंत्रिविष्टपइति॥आत्मेसात्मविदामिति॥
आत्मानंविदंतीसात्मविदःयोगिनः।तेषांसएवात्मा।चित्तत्वं
तेजोरूपीहृदयांतरेस्थितः॥तथाचश्रुतिः॥सूर्यआत्माजगतस्तु
षश्चेति॥जगतोजंगमस्यतस्थुषःस्थावरस्यक्रतुश्चयजंताय
जमानानांसएवक्रतुःयज्ञःयतउक्तंअग्नौप्रस्ताहुतिसम्यगा ३

दित्यमुपतिष्ठति॥आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति
॥अथप्रभुरमरज्योतिषांअमरादेवाःज्योतींषिग्रहनक्षत्रादीनि
तेषांपतीप्रभुः।प्रधानइत्यर्थः॥यतःसर्वएवदेवयोनयस्तस्यो
पजीवनंकुर्वंति॥ग्रहनक्षत्राणांकेवलंतद्दर्शनेनित्योदयास्तम
याः॥यतउक्तं॥तेजसांगोलकःसूर्योग्रहर्क्षाण्यंबुगोलकाःप्र
भावंतोहिदृश्यंतेसूर्यरश्मिःसुदीपिताइति॥एवंगुणविशिष्टा
दमरज्योतिषांप्रभुः॥लोकानांप्रलयोद्भवस्थितिर्विभुरिति॥लोका
भूर्लोकादयस्तेषांप्रलयेविनाशेउद्भवेउत्पत्तौपालनेप्रभुर्विभु
ताभगवतः॥अतीतवर्तमानाभाविकालत्रयपरिच्छेदचिन्हभू
तत्वात्॥चराचरेवधारतो॥आनेकध्यायःश्रुतोवेदेयोनेकःप्र

कारः पठ्यते॥ तथा चोक्तं॥ इंद्रं मित्रमित्यादिश्रुतेः॥ अधुनास्य
शास्त्रस्य परप्रणीतत्वादनर्थक्यं परिजिगीषुस्तथान्यशास्त्रेभ्यो
गुणाढ्यं प्रदर्शयन् शार्दूलविक्रीडितेनाह॥ ॥भूयोभिः पटुबुद्धि-
भिः पटुधियां होराफलज्ञप्तये शब्दन्यायसमन्वितेषु बहुशः
शास्त्रेषु दृष्टेष्वपि॥ होरातंत्रमहार्णवप्रतरणे भग्नोद्यमानामहं
स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे॥२॥ ॥होरातं
त्रमहार्णवप्रतरणे भग्नोद्यमानां शास्त्रप्लवं प्रारभे होरातंत्रमहा
र्णवो महासमुद्रः तस्य प्रतरणे प्रतरविषये भग्नोत्साहानामहं शा
स्त्रप्लवं प्रारंभं करोमि॥ शास्त्रमेव प्लवः तं शास्त्रप्लवंतीति पूर्ण
पारगमनमाशु संपादयतीति तथेदमत्ति होरातंत्रमहार्णवप्रत

प्रकाशसाधर्म्यात्॥ तथा मूर्त्तिपरिकल्पितः शशभृत् ततः शशं प्राणि
विशेषं बिभर्त्ति धारयतीति शशभृच्चंद्रमाः तस्य मूर्त्तिः शरीरलेप
रिकल्पितपर्य्यंत्रस्थापितः॥ यतो जलमयः श्चंद्रमाः दीधितिभिर्न्यः स्त
स्मिंस्तरणेः किरणं प्रतिफलना ज्योत्स्ना प्रसरविस्तारः यस्मादुक्तं
सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं क्षपयंति द
र्पणोदरनिहता इव मंदिरस्यांतरमिति तथा च वेदेषु सुषुम्नः सूर्यरश्मि
श्चंद्रमा इति शशिभृत्तो महादेव देवस्य मूर्त्तिः परिकल्पितः सो भग
वानष्टमूर्त्तिः॥ उक्तं च॥ स्वासेंदुमरुदर्कमहीपयोभिस्याभिरेव तनु
भिरिति महेशमूर्त्तिः॥ क्षितिजलपवनहुताशनतपनगगनचंद्रमा
ख्याः इत्यष्टौ मूर्त्तयः॥ तस्य माहेश्वरी मूर्त्तिः सूर्य इत्यर्थः॥ शशिभृ

रणाद्यमानामपीत्यसाप्लुवेनसाधर्म्यकेनकृतेहोरातंत्रमहर्णव
प्रतरणे भग्नोद्यमानामित्याचाह॥ भूयोभिरिति॥ भूयोभिःब
हुतरैः किंभूतैः पटुबुद्धिभिःचतुरप्राज्ञाः तैःशास्त्रेषुदृष्टेषुविर
चितेष्वपिसत्सुतेषुशब्दन्यायमीमांसाः शब्दोअर्थवान्न्याय
मीमांसाः समन्वितेषुयुक्तेषु।पटुधियांहोराफलज्ञप्तयेहोरा
फलंतस्यज्ञप्तिः तत्फलंशुभाशुभंतत् ज्ञानायकिंभूतंशास्त्रप्लु
वंस्वल्पंलघुग्रंथं॥ वृत्तविचित्रं॥ वृत्तैः शार्दूलविक्रीडप्रभृति
भिर्विचित्रैरम्यं॥ तस्मात्स्वल्पार्थत एवास्यगुणबापतः स्तेषा
मप्युद्यमानभंगोनभवतिस्वल्पमनेनग्रहणधारणसुखत्वं
प्रदर्शयति॥ ननुस्वल्पशास्त्रस्याल्पार्थत्वएवभविष्यतीया

त आह॥ अर्थबहुलं बह्वभिधेयं शास्त्रमल्पं प्रारभेऽहमिति स्वल्पं
लघुवृत्तमदीर्घं विचित्रं रम्यं अर्थबहुलं चित्रपरिपूर्णं सुखावह
॥ ॥अधुना शास्त्रस्य प्राकृतकर्मविपाकव्यंजकत्वं वर्णद्वयप
रिहारेणाशब्दव्युत्पत्तिप्रदं प्रतिज्ञादर्शयमिदं वक्त्रयाह॥ ॥हो
रेत्यहोरात्रविकल्पमेके वांछंति पूर्वापरवर्णलोपात्॥ कु
र्मार्जितं पूर्वभवे सदादी यत्तस्य पक्तिं समभिव्यनक्ति॥ ३॥ ॥
होरार्थं शास्त्रे होरानाम होरात्रविकल्पमेके वांछंति॥ अहश्च रा
त्रिश्च अहोरात्रिशब्देनोच्यंते॥ मेषादयो द्वादश लग्ना अहोरा
त्रांतर्भूताः लग्नस्य च कालवशात् ज्ञानं॥ अतो होराश्रयत्वात्तेन
एव होराशब्दो व्युत्पाद्यते॥ एतदाचार्यस्याभिप्रेतं॥ यतः परमत

बृ०

६

तच्छुभाशुभं ज्ञात्वा शांत्यादिभिरुपशमं भवतु॥ तथा च यवनेश्वरः॥
यद्वद्विधाने नियतं प्रजानां ग्रहर्क्षयोगप्रभवं प्रसूतौ॥ भाग्या
नितानी यथिशास्त्रदृष्टं निवर्त्तनियोगेनि दर्शानराणां॥ तदप्य
भिज्ञैर्द्विविधं निरुक्तं स्थिरमौत्पातिकसंज्ञं च॥ कालक्रमोज्ज्ञा
तकनिश्चितं यत्क्रमोपि सर्पि स्थिरमुच्यते॥ तत्सत्यग्रहाणां प्र
यितानि यानि स्थानानि जन्मप्रभवानि सद्भिः॥ तेभ्यः फलं च
र ग्रहक्रमस्थाद्यदुःपदौत्पातिकसंज्ञं तत्॥ अनेन अस्थिरशां
त्यादिभिरुपशमनं प्रदर्शितो भवति॥ उक्तं च॥ हन्यते दुर्बलं
दैवं पौरुषेण विपश्चितेति॥ ॥अधुना व्यवहारार्थं का
लाख्यस्य पुरुषस्य मेषादिराशिपूर्वकं शिरःप्रभृत्यंगवि

टीका

६

भागंशार्दूलविक्रीडितेनाह॥ कालांगानि वरांगमाननमुरो हृत्क्रोडवा
सोभृतो वस्तिर्व्यंजनमूरुजानुयुगले जंघे ततोंघ्रिद्वयं॥ मेषाश्वीप्रथ
मा नवर्क्षचरणाश्चक्रस्थिता राशयो राशिक्षेत्रगृहर्क्षभानि भव
नं चैकार्थसंप्रत्ययाः॥४॥ ॥कालस्यांगानि कालांगानीति च मेष
प्रथमराशयः नवर्क्षचरणाः नवभिर्नक्षत्रपादैः प्रमाणं अश्विप्रथ
मा॥ मेषप्रथमराशयोर्नवचरणो रिति अश्विनी भरणी कृत्तिका
पादं मेषः इति॥ अनेन संस्थाना मेषा राशीनां प्रदर्शनं भवति॥ त
त्र कालाख्यस्य वरांगं शिरो मेषः॥ आननं मुखं वृषः उरो वक्षो मि
थुनः हृदयं कर्कः क्रोडमुदरं सिंहः वासोभृत्कटिः कन्या वस्तिर्नाभिव्यं
जनयोरंतरं तुला॥ व्यंजनयेन पुंस्त्वं व्यज्यते लिंगं तद्वृश्चिकः ऊरू यु

वृ० गलं धन्वी जानुयुगलं मकरः जंघे कुंभः अंघ्रिद्वयं पादयुगलं मीन टीका
७ इति॥ तथा च बादरायणः॥ मेषः शिरोथ वदने वृषभो विधातुर्वक्षोभ
वेन्नृमिथुने हृदयं कुलीरः॥ सिंहस्तथोदरमथो युवतिः कटिश्चव
स्तिस्तुलाभृदथ मेहनमष्टमः स्यात्॥ धन्वी सात्र्योरूयुगलं मक
रो जानुद्वयं जंघाद्वितयं कुंभः पादौ मत्स्यद्वयं चेति॥ प्रयोजनं जन्मका
ले यो राशिः पापग्रहक्रांतः सकलाख्यपुरुषस्य यस्मिन्नंगे स्थितः
तत्रांगजातस्योपघातो वक्तव्यः॥ यत्र सौम्यस्थितस्तत्र पुष्टिरिति
॥ तथा च सारावल्यां॥ कालनरस्यावयवाः पुरुषाणां कल्पयेत्प्र
सवकाले॥ सदसद्ग्रहसंयोगात्पुष्टाः सोपद्रवाश्चा क्षेत्रं च ऋक्षं चे
ग्रहं चाभं चा तानि राशिक्षेत्रग्रहऋक्षभानि भवनं च गृहत्वाद्भव ७

प्रसिद्ध। अनुमतमिति तथा सारावल्यां॥ आद्यंतवर्णलोपाद्धोरा
स्माकं भवत्यहोरात्र॥ तत्प्रतिबद्धः सर्वो ग्रहभगणश्चिंतितो यस्मात्
किमस्य प्रयोजनमित्यत आह॥ कर्मार्जितं पूर्वभवे सदादि॥ पूर्वभवे प्राग्
जन्मन्यनिसयदादिशुभमशुभं कर्मार्जितं तस्य पंक्तिं पाकं सम्यग्व
त्क्तिं प्रकटीकरोति॥ तथा च स्वल्पजातके॥ यदुपचितमन्यजन्म
नि शुभाशुभं तस्य कर्मणः प्राप्तिं व्यंजयति शास्त्रमेतत्तम
सि द्रव्याणि दीप इव॥ ननु शुभस्याशुभस्य वा वस्यः भाविनः
किं व्यक्तं॥ उच्यते द्विविधं शुभाशुभं दृढकर्मोपार्जितं अदृढकर्मो
पार्जितं च॥ अदृढकर्मोपार्जितस्य दशाफलपाककर्मेणाव्यक्तिः॥
अशुभदशाफलं ज्ञात्वा दशादिपरिहारः कर्तव्यः॥ शुभं शात्वा यत्रा
देरतिशयेन यानं अदृढकर्मोपार्जितस्याष्टकवर्गेन फलव्यक्तिः॥

नग्रहणोसि पीत्तिराशि क्षेत्रमित्यादि॥ एषांच प्रत्येकं राशिरिति संज्ञा
तस्यैव पर्यायनामानि॥ क्षेत्रं। ग्रहं। ऋक्षं। भंच। राशिश्च। इद्मुनर्भये
नं ग्रहणं कृतं तत्सर्वेषां ग्रहपर्यायाणां ग्रहणार्थं॥ ऋक्षत्वादपि भग्रह
णेसिद्धे यत्पुनर्भग्रहणं तेनैतद्दर्शयति॥ यत्र तत्र होराशास्त्रे भग्र
हणमृक्षग्रहणं वा तत्र तत्र राशेरेव ग्रहणं स्यात् न तु नक्षत्रस्य॥ ए
ते राश्यादयः शब्दा एकार्थसंमत्यया एकार्थाभिधायिका इत्यर्थः॥ ॥
॥ ॥अधुना राशीनां स्वरूपविज्ञानं वसंततिलकेनाह॥ ॥मत्स्यो
घटी नृमिथुनं सगदं सवीणं चापी नरोश्वजघनो मकरो मृगास्यः।
तौली ससस्यदहना प्लवगा च कन्या शेषाः स्वनामसदृशाः स्वचरा
श्च सर्वे॥५॥ ॥मत्स्यो मीनराशिः मत्स्यद्वयमन्योन्यपुच्छाभिमुखं

टीका

टी० तस्यैवोभयोर्दयितालग्नं समेसुभयतः पृथुरोमयुग्मभिः। घटीकुं
८ भः स्कंधासक्तरिक्तघटः पुरुषः कुंभः मिथुनो नृमिथुनं नो मिथु
नं स्त्रीपुंसौ तं मिथुनं। सगदं सवीणं पुमान्सगदः स्त्री सवीणा
चापी नरोश्वजघनः धन्वी राशिः चापी विद्यमान धन्वी नरो अ
श्वजघनो अश्वस्य तुरगस्य जघनं यस्या सा अश्वजघनः चतु
ष्पादइत्यर्थः॥ मकरो मृगास्यः॥ मकरो राशि मकर एव स च मृगा
स्यः मृगमुखः॥ तौली स्यादि तुला विद्यमानस्तौली पुरुषः॥ कंन्या
कुमारी प्लवगा नौस्था ससस्यदहना सस्यां निदहनश्च सस्यद
हनौ तौ विद्यते यस्याः सा ससस्यदहना। शेषाः स्वनामसदृशाः शे
षा राशयः मेषकर्कट सिंह वृश्चिकाः स्वनामसदृशाः स्वसंज्ञा वे ८

बृ० मीनो जलचर इति॥ तथा च यवनेश्वरः॥ आद्यः स्मृतो मेषसमा
९ नमूर्तिः कालस्यैतौस्य मूर्धा गदितः पुराणैः॥ सोजाविकासंच
रकंदराद्रिस्तेनाग्निधात्वाकररत्नभूमिः॥१॥ वृषाकृतिस्स्क
प्रथितो द्वितीयः सवक्त्रकण्ठायतनं विधातुः॥ वनाद्रिसानुद्वि
पगोकुलानां कृषीवलानामधिवासभूमिः॥२॥ वीणां गदां
च मिथुनं तृतीयः प्रजापतेस्कंधभुजांसदेशः॥ प्रनर्तकोगा
यनशिल्पकस्त्रीक्रीडारतिद्यूतविहारभूमिः॥३॥ कर्कः कुली
राकृतिरंबुसंस्थो वक्षप्रदेशो विहितश्च धातुः॥ केदारवाप्यपु
लिनानि तस्य देवांगनारम्यविहारभूमिः॥४॥ सिंहस्तु शैले
हृदयप्रदेशो प्रजापतेः पंचममातुरार्यः॥ तस्याटवीदुर्गगुहाव ९

नाद्रिव्याधावनीदुर्गवनप्रदेशाः॥५॥ प्रदीपिकां गृह्य करेण कन्या
नौस्था जले तिष्ठमिति ब्रुवंति॥ कलार्थधीराजठरं विधातुः स
शाद्वलस्त्रीरतिशिल्पभूमिः॥६॥ वीथ्यां तुलापण्यधरो म
नुष्यः स्थितः सनाभिः कटिमध्यदेशः॥ शुक्लार्थवीथ्यां पणाप
हृनाथसार्थान्वितास्त्रैयोत्रनसस्यभूमिः॥७॥ श्वभ्रेष्टमो वृश्चि
कविग्रहस्तु प्रोक्तः प्रभोर्मेढ्गुदप्रदेशः॥ गुहाबिलश्वभ्रविषाश्म
गुप्तिवल्मीककीटाजगराहिभूमिः॥८॥ धन्वी मनुष्यो हयपश्चिमा
र्धस्तमादतरूभुवनप्रणेतुः॥ समस्थितव्यस्तसमस्तवाजीशू
राश्वश्वभद्याङ्गरथाश्वभूमिः॥९॥ मृगाद्यभूमिं मकरो मृगाद्यो जा
नुप्रदेशं तमुशंति धातुः॥ नदीवनारण्यसरोजरूपश्वभ्रादि

वासोदशमः प्रदिष्टः ॥१०॥ स्कंधे तु रितेः पुरुषस्य कुंभो जंघोत्तमे
कादशमाहुराद्याः ॥ श्रुष्कोदकाधारकुजस्य पक्षिस्त्रीशौंडिक
द्यूतनिवासभूमिः ॥११॥ जले तु मीनद्वयमंसराशिः कालस्य
पादौ विहितौ वरिष्टौ ॥ सुपुण्यदेवं द्विजदेवतीर्थभूमिर्नदी
समुद्रांबुचयादिवासः ॥१२॥ प्रयोजनमहृतेन स्थादिषु स्थानप
रिज्ञानं ॥ उक्तं च ॥ राशिभ्यः कालदिग्देशा इति ॥ ॥ अथ धु
नाराशिनवांशकद्वादशाधिपात् कुकुटकेनाह ॥ ॥ क्षितिज
सितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगु
रवश्च गृहांशकपाः ॥ अजमृगतौलिचंद्रभवनादिनवांशवि
धिर्भविनसमांशकाधिपतयः स्वगृहक्रमशः ॥ ॥ क्षितिजा

दिता स्तयः ॥ तद्यथा ॥ मेषो मेष एव ॥ वृषोक्षाः कर्कट कुलीरो जल
चरप्राणी ॥ सिंह केसरी ॥ वृश्चिकः कीटजातिः ॥ तथा च सत्यः ॥ छा
गो वृषभो वीणागदाधरमिथुनमंभसि कुलीरः ॥ सिंहः शैले क
न्या नौस्था दीपसस्यकरा पुरुषस्तुलाधरो वृश्चिकोथ धन्वी
नरोहयांत्यार्धः ॥ मकरार्धं मृगपूर्वं कुंभी पुरुषो झषो मीनः ॥
स्वचराश्च सर्वे ॥ सर्वे द्वादशराशयः स्वेषु स्वेषु स्थानेषु चरंति
॥ दृष्टास्थाने निवासिन इत्यर्थः ॥ मेष वृषा वरण्यो दिवा ॥ रात्रौ
ग्राम्यो ॥ मिथुने ग्राम्यः ॥ कर्कटांबुचर सिंह आरण्यः ॥ कन्याद
र्शितदेशविश्रामी ॥ तुला आपणविर वृश्चिकः श्वभ्रचारी ॥ धन्वी
ग्राम्यः मकरपूर्वभागः ॥ आरण्ये ॥ अन्य जलचराः ॥ कुंभो ग्राम्यः ॥

दयोग्रहाः मेषाद्यानांपतयः क्षितिजोंगारकः समेषस्याधिपतिः।
सितः वृषस्य। ज्ञो बुधो मिथुनस्य। चंद्रः कर्कटस्य रविः सिंहस्य॥
सौम्यो कन्यायाः सितस्तुलायाः। आवनिजो वृश्चिकस्य सुरगुरुध
न्विनः मंदः मकरस्य सौरिः कुंभस्य गुरुर्मीनस्येति॥ होरास्वामिगु
रुज्ञवीक्षितयुतस्य त्र॥ एत एव नवांशकाधिपतयः॥ न केवलं भौमो
मेषाधिपतिर्यस्मिन्यस्मिन्राशौ मेषनवांशकोदयो भवति॥ तस्या
पि भौमोधिपतिः॥ शेषाणामप्येवयुतेच कथं भवतीत्याह॥ अ
जमृगतौलिचंद्रभवनादि नवांशविधिरिति॥ मेषमकरः तुला
कर्कटः॥ आदि नवांशविधिरिति प्रत्येकमपि संबध्यते॥ तदुक्तं
मेषकेसरिधन्वीनां मेषाद्या अंशका स्मृताः॥ वृषकन्यामृगा

२०

णांचमकराद्यानवांस्मृताः ॥ तुलामिथुनकुंभानांतुलाद्यानवकीर्त्ति
ताः ॥ कर्कटालिझषाणांचकर्कटाद्यानवांशकाइति ॥ भवनसमां
११ शकाधिपतयः ॥ स्वगृहात्क्रमशः ॥ भवनसमांश
काः भवनानिद्वादश ॥ तस्माद्द्वाद शांशाइत्यर्थः
प्रत्येकराशेः स्वगृहाद्दारभ्यगणनी याः मेषस्यमे
षादिमीनपर्यंतंद्वादशभागाभवं ति ॥ ॥ एवं
अधुनात्रिंशांशकाधिपतिवुष्वि तायग्याह ॥ ॥

मे	मव	तु	कृ
मे	म	तु	कृ
सिं	वृ	मि	वृ
ध	सि	कुं	मा

कुजरविजगुरुज्ञशुक्रभागाः पवनसमीरणकौचिजूकलेयाः
॥ अयुजियुजिभेविपर्ययस्ताःशशिभवनालिझषांतमृक्षसंधिः
॥ ॥ कुजरविजः गुरुज्ञः शुक्रः एषांभागाः पवनावायवः एव ११

१२ तइति॥एतद्देवलोकेगंडांतमितिप्रसिद्धं॥उक्तंच॥अश्विनीपि
त्र्यमूलाद्यमेषसिंहहयादयः॥विषमार्क्षांनिवर्त्तंतेपादवृध्या
यथोनरमिति॥प्रयोजनं॥संधौपापैःशशिनिचजडःस्यांन
चसौम्यदृष्टाइति॥ ॥अधुनाव्यवहारार्थमेषादीनांसंज्ञा
पर्यायेणाह॥क्रियतावुरिजितुमकुलीरलेयपाथोनजूकको
र्प्याख्याः॥तौक्षिकआकोकेरोहृद्रोगश्चांत्यभंचेत्थं॥८॥ ॥
इत्येवंप्रकारनामानोमेषाद्याराशयोज्ञेयाः॥तद्यथा॥क्रियोमे
षः॥तावुरिर्वृषभः॥जितुमोमिथुनः॥कुलीरःकर्कटः॥लेयः
सिंहः॥पाथोनःकन्या॥जूकस्तुला॥कौर्प्याख्योवृश्चिकः॥तौक्षि
कोधन्वी॥आकोकेरोमकरः॥हृद्रोगःकुंभः॥अंत्यमीनइति॥प्र १२

योजनं॥गोसिंहजितुमाष्टमौक्रियतुलाइत्यादि॥ ॥अधु
नाग्रहस्यक्षेत्रहोराद्रेष्काणद्वादशांशनवांशत्रिंशांशानांवर्ग
संज्ञाव्यवहारार्थमिंद्रवज्रयाह॥द्रेष्काणहोरानवभागसंज्ञास्त्रिं
शांशकद्वादशसंज्ञिताश्च॥क्षेत्रंचयद्यस्यसतस्यवर्गोहोरेति
लग्नभवनस्यचार्धं॥९॥ ॥द्रेष्काणादयःषट्पदार्थाःग्रहस्य
वर्गसंज्ञाः॥तत्रद्रेष्काणोराशित्रिभागः॥होराराश्यर्धंनवभागो
नवांशकः॥तथात्रिंशांशास्त्रिंशद्भागाः द्वादशांशोद्वादशभागः
एतत्संज्ञिताश्च॥क्षेत्रंराशिः॥तथायद्यस्यसतस्यवर्गः॥एते
सर्वेतत्कग्रहस्यात्मीयावर्गसंज्ञाः॥एवंषड्विकल्पोराशिः॥षड्रा
त्मीयेषुस्थितावर्गस्याभवंतिग्रहाः॥नुतग्रहस्यषड्विकल्पाः॥से

भवंति॥नकस्याचित् यतः श्वेद्राकेयोः स्त्रिंशांश१कभावः भोमादी
१२ नाहोराभावः॥तस्मात्से चसंभवंति।तेन पंचस्वामी येषवस्थि
तोवर्गस्थः एतदप्युपलक्षणार्थं अतोयथासंभवं त्र्यादिविकल्प
स्यो ग्रहोवर्गस्य उच्यते॥यस्मान् भगवान् गार्गिः॥क्षेत्रं होरा
र्धद्रेष्काणो नवांशो द्वादशांशकः॥त्रिंशांशश्च कश्च वर्गोयस्सर्व
स्यसमुदाहृतः॥त्र्यादिष्वपि पदार्थेषु स्थितस्वेषु स्ववर्गः॥प
रवर्गतोगप्यवं ग्रहोभवतिचान्यथेति॥प्रयोजनं॥एको पिच
क्रोपगतोनराणां शुभोशुभोवापिचतुष्टयस्थ वर्गोपिवास्यो
गोपिनाशं बहुप्रकारं कुरुते ध्वगाने॥होरेतिलग्नं भवनस्य
चार्धमिति।होरेतिलग्नं॥होरास्वामी गुरुज्ञवीक्षितयुते
ति॥भवनस्य चार्धं राशेरर्धं होरा॥मार्तंडेद्वारयुजियुजि १३

भागाः कुजस्यसमीरणाः ५ रविजस्यकोप्योरवे ८ वृश्चिकः नकतुला
७ बुधस्यालेयसंज्ञा सिंहस्यसचपंच ५ एवंत्रिंशत्॥अयुजीति।
अयुजिविषमराशौ कुजादयोग्रहाः॥युजितुभे समराशौ विपर्य
स्याः विषमराशौ कुजादित्रिंशत् ३० भागाः समराशौ शुक्रादिक्र
दास्य मेणांशाइति॥प्रयोजनं कन्येक दुष्टाव्रजतीहं साध्वी समायाकु
चा८ रित्रयुक्ता॥भूम्यात्मजर्क्षेक्रमशोंशकेषु वक्रार्किजीवेंदु
जभार्गवाणामिति॥राशिभवनालिझषांत
मृक्षसंधिः॥राशिभवनं कर्कटः अलिझषो
मीनएषामंतंनवमनवांशकः यत्रनक्षत्रराश्यो
युगपदवसानं।तदृक्षसंस्थिः॥यस्मादाश्ले
षांते कर्कटः जेष्टांते वृश्चिकांतः रेवत्यंते मीनं

विषमराशौ					समराशि:
मे	मि	सिं	शु	छ	गु रा मं
तु	ध	कुं		५।७।८।५।५	
मं	रा	गु	छ	शु	भागा ३०
५	५	८	७	५	

समभेचंद्रभान्वोश्च होरेति॥ ॥अधुनाराशीनां रात्रिदिनसं
ज्ञत्वं पृष्ठोदयशीर्षोदयत्वं चैव संततिलकेनाह॥ ॥गोजाश्विक
र्कि मिथुनाः समृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त
एवाशीर्षोदया दिनबलाश्च भवंति शेषाः लग्नं समेत्युभयतः पृथुरो
मयुग्मं॥१०॥ ॥गोजाश्विकर्कि मिथुना इति॥ गो वृषः अजो मेषः
अश्वि धन्वी कर्कि मिथुनः समृगा निशाख्याः एते षड्राशि रात्रिब
लसंज्ञाः॥ पृष्ठोदया विमिथुना इति मिथुनवर्जिताः पृष्ठोदयसं
ज्ञा मिथुना शीर्षोदय इति। शेषाः सिंह कन्या तुला वृश्चिक कुंभमी
न शीर्षोदया शिरसा उदयंति दिनबलाश्च भवंति॥ द्विपदोदयो
हि निशि च प्राप्त संध्याद्वय इति॥ तस्मात् संज्ञामात्रं बलग्रहणं

प्रयोजनंच॥ रात्रिघुसंज्ञेषु विलोमजन्मेत्यादि॥ तथा पृष्टोदयं कोद
१४ यर्क्षेगाद्बूति॥ यात्रायां वक्ष्यति॥ शीर्षोदये समभिवांछित्तकार्य
सिद्धिः पृष्टोदये विफलता बलविद्ववश्च्य॥ तथा च॥ शस्तं द्विवादि
नबले मिश्रिनकुवीर्यराशौ विपर्ययबले गमनं च शास्तं॥ लग्नं स
मेत्युभयतः पृथुरोमयुग्ममिति॥ पृथुरोममत्स्यः तद्युग्मं म
त्स्यद्वयं उभयतः पृष्टाशिरोभ्यां लग्नमांससतं समेत्या गच्छति।
॥ ॥ अधुना राशीनां क्रूरसौम्यविभागस्त्रीपुर्षविभागं च
रस्थिरद्विस्वभावप्रविभागं निगधिपत्तिलं होराद्रेकाणपती
नां प्रविभागं मंदाक्रांतयाह॥ ॥ क्रूरः सौम्यः पुरुषवनिते ते चरा
गद्विदेहाः प्रागादीशा क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः॥ १४

सुस्थिरस्वभावः॥द्विस्वभावेषुमिश्रस्वभावाभवंति॥तथाचसत्यः
चरसंज्ञाःस्थिरसंज्ञाःद्विः।प्रकृतिरितिराशयःक्रमशः।राशिस्व
भावतुल्यजातिःप्रतयःप्रसूतानां॥प्रागादीशाइति॥क्रियवृ
षनृयुक्कर्कटाःसत्रिकोणाःप्रागादीश्वरःअधिपतयोभवंति।
तेनमेषसिंहधन्वीपूर्वस्यां।एवंप्रयोजनं।हृतनष्टादिद्रव्यस्य
चौरादेर्वादिग्विज्ञानप्रसूतिकागृहद्वारविज्ञानंच॥मार्तंडइंदोर
युजिसमभेश्चंद्रभान्वोश्चहोरे।मार्तंडःसूर्यःइंदुः।रयुजिविषम
राशौमार्तंडइंद्वोः॥समेसमराशौश्चंद्रभान्वोहोरेभवतः।प्रयोज
नं॥सूर्यहोरायांजाताःतेजस्विनःचंद्रहोरायांमृदुस्वभावाश्चभवं
ति।द्रेक्काणास्त्रुःस्वभवनसुतत्रित्रिकोणाधिपानां॥द्रेक्काणरा
शित्रिभागःस्वभवनाधिपतेःप्रथमोद्रेक्काणःसु

तभवनस्यपंचमस्थानाधिपतेःत्रिकोणस्यनवमस्थानाधिपतेः
भवंति॥प्रयोजनंद्विरुत्तमस्वांशकभागगेरित्यादि॥ ॥अधुना
मतांतरेणहोराद्रेक्काणमिंद्रवज्रयाह॥ ॥केचित्तुहोराप्रथमांभ
पस्यवांछंतिलाभाधिपतेर्द्वितीयं॥द्रेक्काणसंज्ञामपिवर्णयंति
स्वद्वादशैकादशराशिपानां॥१२॥ ॥केचिद्यवनेश्वरादयः।प्र
थमांहोरांभपस्यराश्यधिपतेर्वांछंति॥द्वितीयांलाभाधिपतेरेका
दशस्थानाधिपस्य।यथामेषस्यप्रथमहोराभौमस्यद्वितीया
सौरस्य।एवंसर्वेषामपिद्रेक्काणसंज्ञामपीति॥स्वद्वादशैकादश
राशिपानांप्रथमस्वाधिपतेराशीयस्यस्वामिनः।द्वितीयंद्वादशा
धिपतेःतृतीयमेकादशाधिपतेर्यथामेषस्यप्रथमद्रेक्काणोभौम
स्यद्वितीयोजीवस्य।तृतीयःसौरस्य।एवमन्येषामपि॥तथाचय

वनेश्वरः॥ आद्यं तु होराभवनस्य यस्यरे एकादशाक्षत्रपते द्विती
१६ या॥ स्वद्वादशैकादशराशिपानां द्रेक्काणसंज्ञा क्रमशस्त्रयोत्रा॥ एवं
यवनेश्वरमतेन सर्वग्रहाणां होराधिपत्यमस्ति॥ एतदाचार्यस्य
नाभिप्रेतं॥ सत्यादीनामपि॥ तथा च सत्यः॥ ओजे पुरवे होरा प्र
थमे ह्यु युग्मेषु चोत्तरा शेषाः॥ इंदोः क्रमशो ज्ञेया जन्मनि चेत्रो स्व
होरास्वे राशिस्तद्रेक्काणस्तत्संचनवमभवनपतयस्ते तेषाम
धिपतयः स्वस्वद्रेक्काणबलिन इति॥ ॥अथ ग्रहाणामुच्च
नीचविभागं पुष्पिताग्रयाह॥ ॥अजवृषभमृगांगनाकुली
रझषवणिजौ च दिवाकरादितुंगाः॥ दशशिखिमनुयुक्तिथी
द्रियांशैस्त्रिनवकविंशतिभिश्च तेस्तनीचाः॥१२॥ ॥अजा १६

मार्तंडहोरयुजि समभे चंद्रभान्वोश्च होरे द्रेक्काणाः स्युः स्वभव
नसुतत्रित्रिकोणाधिपानां॥११॥ ॥क्रूरसौम्य इति ते मेषादयो रा
शयः यथाक्रमं क्रूरसौम्यसंज्ञा मेष क्रूरः वृषः सौम्यः एवं सार्वेषां
योज्यं॥ प्रयोज्यं प्रयोजनं॥ क्रूरेषु जाताः क्रूरस्वभावः सौम्येषु जा
ताः सौम्यस्वभावा भवंति॥ तथा च सत्यः॥ ओजः पुरुषा ज्ञेयाः सौम्या
स्त्रीसंज्ञाः क्रमाद्युग्मे॥ उग्रेषु ग्राः पुर्वा सौम्या युग्मेषु भवनेषु पु
र्षवनित इति॥ तत एवं मेषादयो यथाक्रमं पूर्ववनिताख्या ज्ञेयाः ते वि
षमराशयः पुरुषा युग्मराशयः स्त्रीसंज्ञा॥ प्रयोजनं च॥ पुरुषरा
शिषु जातास्तेजस्विनः॥ स्त्रीराशिषु जाता मृदवो भवंति॥ ते चरा
गद्विदेह इति॥ ते च मेषः चरः वृषो गः स्थिरः मिथुनो द्विस्वभावः॥
एवं कर्कटादि प्रयोजनं॥ चरराशिषु जाताः चरस्वभावाः॥ स्थिरे

दयो राशयो यथाक्रमेण दिवाकरादीनां ग्रहाणां तुंगा उच्चसंज्ञाः॥ त
था॥ तथा॥ अजः आदित्यस्योच्चः॥ वृषश्चंद्रस्य॥ मृगः अंगारकस्य॥
अंगना बुधस्य॥ कुलीर जीवस्य॥ झषः शुक्रस्य॥ वणिक् तुलः सौरस्य
एतएव राशयो दशादिष्वंशभागेषु [illegible]च्चाः॥ आदित्यस्य दशभागेउ
च्चः॥ चंद्रस्य त्रिशिखि तृतीये भागे॥ भौमस्य मकरे मनुयुगे २८ अष्टा
विंशे मनु द्विगुणा इति॥ बुधस्य कन्या तिथि १५ संख्या॥ गुरोः कर्कट
इंद्रिय ५ संख्या॥ शुक्रस्य मीन स्त्रिनवक २७॥ सौरस्य तुला विंशे २०
ननु सर्व एव राशिरुच्चसंज्ञा सर्वत्रिंशद्दंशकः॥ तत्र दशादीनां त
दंतर्भूतानां सिद्धेवोच्चसंज्ञा॥ तत्कीदृशाद्यपदानां कार्यं॥ ॥परमो
च्चज्ञानं सर्वत्रिंशद्दंशकः॥ तत्र दशादीनां तदंतर्भूतानां सिद्धैवो

च्चसंज्ञाः तेनोक्ता राशिदशाद्यासंख्याः कथितग्रहाः परमोच्चस्था
१७ इत्युच्यते॥ परमोच्चज्ञानेन चात्रव्यतिरिक्तं तत्प्रयोजनमस्ति
॥ तथा च भगवान् गार्गिः॥ स्वोच्चगो रविरंशीतांशुः जनयेतां
नराधिपं॥ उच्चस्थो धनिनं ख्यातं स्वत्रिकोणगतावपि॥ तथा च
यवनेश्वरः॥ स्वोच्चेषु सर्वान् परिगृह्य भागांस्तिष्ठंत्सु कर्मसु सर्वे
षु बलाधिकेतु॥ लग्ने शुभे पूर्णवपुष्मतीदौ त्रैलोक्यराज्याधि
पतिः प्रसूतेः॥ सूर्यस्य भागे दशमे तृतीये सोमस्य जीवस्य
तु पंचमेंशे॥ शुक्रस्य विंशत्यधिसप्तके च बुधस्य भागे तिथि
चैव नूनं॥ भौमस्य विंशोष्टयुतेन नूनं विंशे तथा सूर्यसुतस्य
चोच्च॥ अस्तनीचाः। अस्तः सप्तमः॥ स्वोच्चात्सप्तमः प्रत्येकस्य १७

बृ० मषष्टहयांगतोलिकुंभास्त्रिकोणभवनानि भवंति सूर्यात् ॥१५॥ ज्या०
१८ चरगृहादिषु चरस्थिरद्विस्वभावेषु यथासंख्यं पूर्वमध्यपर्यंत
ततः ॥ आदिमध्यावसानततः ॥ येनवभागास्तेवर्गोत्तमसंज्ञा भवं
ति ॥ चरेषु प्रथमनवांशो वर्गोत्तमाख्यो भवति ॥ स्थिरेषु मध्य
पंचमः ॥ द्विस्वभावेषु पर्यंततेनवमांशो वर्गोत्तमः ॥ एतदुक्तं भव
ति ॥ प्रत्येकैकस्मिन्नराशौ स्वनवमांशको वर्गोत्तमाख्य इति ॥ त
था च यवनेश्वरः ॥ स्वे स्वे गृहेषु स्वगृहांशकाग्रे वर्गोत्तमास्ते यव
ने निरुक्ता इति ॥ शुभफलान नवभागसंज्ञा इति ॥ ते च वर्गोत्तमा
ख्या नवभागसंज्ञा जन्मनि शुभफलं ददती ॥ याक्षती चा ॥ प्र
योजनं ॥ स्वतुंगवक्रोपगतेस्त्रिसंगुणमिति ॥ सिंहोवृषः प्र
थम इत्यादि ॥ सिंहादयो राशयो क्रमेण सूर्यादीनां ग्रहाणां त्रि १८

कोणभवनानि भवंति ॥ तद्यथा ॥ सूर्यस्य सिंहः ॥ वृषश्चंद्रः ॥ मेषो
भौमः ॥ षष्ठः कन्या ॥ बुधस्य ॥ हयांगो धन्वी गुरोः ॥ तुलाशुक्रस्य कुं
भः सौरस्येति ॥ प्रयोजनं ॥ उच्चत्रिकोणभैर्बलस्थैः स्त्रियायैर्भूप
वराता नरेंद्रा इत्यादि ॥ ॥ अधुना लग्नादीनां द्वादशभागानां त
न्वाद्या द्वादशसंज्ञा उपचयसंज्ञा च संततिलकेनाह ॥ होरादयः
स्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानि शुभास्यदायाः ॥
रिःफाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न
नित्यमेके ॥१५॥ ॥ होरादयो दलग्नादयः तेषां यथाक्रमेण तन्वा
दिनामानि तत्र लग्नस्य तनुं द्वितीयं कुटुंबं तृतीयस्य सहोत्था भ्राता
चतुर्थस्य बंधुः ज्ञातिवाची पुत्राख्यः पंचमः अरिः शत्रुः
पत्न्याख्यः सप्तमः ॥ मरणाख्योष्टमः ॥ शुभाख्यो नवमः ॥ आस्प

३० श्या०
१९

दाख्योदशमः।।आयः एकादशः।रिःफो द्वादशः।। इति शब्दप्रकाश
र्थः।। उपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितं ग्रहाणीति।।अ
रिषष्ठः कर्मदशमं १० लाभं ११ दुश्चिक्यसंज्ञ ३ एतानि ग्रहाणि
स्थानान्युपचयसंज्ञानीति।। एकेचाकेनचित्।। न नित्यमुप
चयानीति वर्णयंति तेषामयमभिप्रायः।। यदि पापग्रहणा
स्वामिशत्रुणा वा दृष्टा भवंति तदोपचयसंज्ञाः। एतदाचार्यस्य व
राहमिहिरस्य नाभिप्रेतं पत्तोसो सर्वदैवोपचयाख्यस्ते
र्व्यवहरति।। सत्यादयोप्येवं।। तथा च सत्यः।। दशमैकादशषष्ठ
तृतीयसंज्ञानि जन्मलग्नाख्योपचयभवनानि स्युः।। शेषा
णि त्वपचयानि।। यवनेश्वरः।। षष्ठं तृतीयं दशमं च राशिं
६ नोपचयास्ते च गर्गादयः। तद्वाक्यां अथोपचयसंज्ञस्य त्रिला

भारिकर्मणां नचेद्भवंति दृष्टा
स्ते पापस्वामिशत्रु ६

१९

नीचाः।। तद्यथा।। आदित्यस्य स्वोच्चान्मेषात्सप्तमस्तुलासः नी
चसंज्ञः।। एवं चंद्रादीनां।। यवनेश्वरः।। स्वोच्चात्तु जामित्रमुशं
ति।। उच्चराशिभागाः।।
श्च सप्तमान राशिसंख्याः।
धास्यादयः परमनीच
मनीचस्थामनिष्टफलं
दर्शितं तथा च गार्गिः।। अं
रपिंडोपजीविनां।। कुर्या

र	च	मं	बु	गु	शु	श
०	१	९	५	३	११	६
१०	३	२८	१५	५	२७	२०
उच्च						
६	७	३	११	९	५	०
१०	३	२८	१५	५	२७	२०
नीच						

नीचविं– लवोय
अथेदृशाः एवं वि
स्या भवंति।। पर
भगवता गर्गेण
धांदिगंबरं सूर्यप
धावति नीचस्थो
पुरुषं राशिभास्करा विति।। ।। अधुना ग्रहाणां वर्गोत्तम मू
लत्रिकोण परिज्ञानं वसंततिलकेनाह।। ।। वर्गोत्तमाश्चरगृहादि
षु पूर्वमध्यपर्यंतगाः शुभफलानवभागसंज्ञाः।। सिंहो वृषः प्रथ

मेकादशं चोपचयर्क्षमाहुः ॥ होरागृहस्वामिशशांकभेभ्यः शेषा
णि चैभ्योपचयात्मकानि ॥ प्रयोजन उपचयग्रहमित्रस्वोच्चगैः
पुष्टमिष्टं ह्युपचयग्रहनीचारिगैर्नेष्टं संपदित्यादि ॥ ॥ पु
नरपि होरादीनां संज्ञांतराणि वसंततिलकेनाह ॥ कल्पस्ववि
क्रमग्रहप्रतिभाक्षतानि चित्तोत्थरंध्रगुरुमानभवव्ययानि
॥ लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे द्यूने च सप्तमगृहं दशमृ
क्षसंज्ञा ॥ १६ ॥ ॥ लग्नादीनां द्वादशानां यथाक्रमं कल्पाद्याः
संज्ञाः ॥ तद्यथा ॥ कल्पं लग्नं १ स्वं २ विक्रमं ३ ग्रहं ४ प्रतिभा ५ क्षतं
६ चित्तोत्थ ७ रंध्र ८ गुरु ९ मानं १० भव ११ व्ययं १२ लग्नाच्चतु
र्थनिधने इति ॥ लग्नाच्चतुर्थमष्टमं ४ । ८ चतुरस्रसंज्ञं द्यूनं
च सप्तमग्रहं लग्नं ॥ दशमृक्षं दशमराशिसंज्ञा ॥ व्यवहारार्थं ज्ञे

२० या॥ ॥अथकेंद्राणांसंज्ञांतस्थराशिबलंचबोधकेनाह॥ ॥
कंकेटकेंद्रचतुष्टयसंज्ञासप्तमलग्नचतुर्थखभानांतेषुयथा
भिहितेषुबलाढ्याःकीटनरांबुचराःपश्चावश्च॥१९॥ ॥कंट
ककेंद्रचतुष्टयसंज्ञाइतिप्रसिद्धानिखभानांदशमं॥तेषुयथा
भिहितेषुबलाढ्याःकीटनरांबुचराःपश्चावश्च॥तेषुयथानि
र्दिष्टेषुकीटःसप्तमस्थानेबली॥नरोनरराशयःएतेलग्नस्थि
ताःबलिनः।अंबुचराःकर्किमिथुनमकरपराधश्चतुस्थाने
बलिनः॥पश्चावश्च॥वृषसिंहधन्व्यपराधमकरपूर्वार्धतेदश
मस्थाबलिनः॥तथाचभगवान्गार्गिः॥नृयुकूतुलाघटःके
न्यापूर्वमर्धंचधन्विनः॥लग्नस्थाबलिनोज्ञेयाएतेहिनरराशयः २०
मिथुनकन्याधन्विपूर्वार्धतुलाकुंभाः

२९ सप्तसंज्ञा।। सुत५पं त्रिकोणसंज्ञं५मे मूर्त्त१० दशमं१० दशमस्था
नं।। अत्रास्मिन्क्रमेण्य परासंज्ञा विद्यात् जानीयात्।। ।।अ
थहोरादीनां राशीनां बलव्यवहारार्थं च प्रमाणं शार्दूलविक्री
डितेनाह।। होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्क
टा केंद्रस्था द्विपदादयो न्हि निशि च प्राप्ते च संध्याद्वये।। पूर्वा
र्द्धे विषयादयः क्रमनु गुणा मानं प्रतीपं च तद्दुश्चिक्यं सहजं ते
पश्चनवमं त्वाद्यं त्रिकोणं च तत्।।१९।। ।। होरास्वामीति।।
होरालग्नं तत्स्वामीति।। होरालग्नं तत्स्वामिना वीक्षिता दृष्ट्या
वीर्योत्कटा।। गुरुज्ञवीक्षितयुता।। गुरुणा बुधेन युता दृष्टा
सति लग्नं उत्तमबला स्यात्।। स्वामिगुरुज्ञवर्जमन्यैश्चयु २९

तद्दृष्टा बलहीनां भवंति।। तथा च बादरायणः।। जीवस्वनाथश
शिजैर्युतदृष्टा बलवती होरा।। नान्यैश्च वीर्योत्कटा।। शेषै बलहीना
देवं मिश्रस्थे- मध्यबला।। यदि सर्वैर्न वीक्षिता नैव युक्ता वा बल
हीना।। केंद्रस्था इति।। वीर्योत्कटा इत्यनुवर्तते।। केंद्रस्थाः।। स
र्वे एव राशयो बलिनः।। पणफरगा मध्यबलः। आपोक्लिमस्थः
हीनबलः।। अत्र केचि ~~क्रम~~पर केंद्रपणफरापोक्लिमानां द्विप
दचतुष्पदकीटानां यथाक्रमे सबलत्वं व्याचक्षते।। तदयुक्तं।।
यस्माद्बादरायणः।। केंद्रस्था सबलास्युः मध्यबला पणफरा
श्रिता ज्ञेया।। आपोक्लिमगा सर्वे हीनबला राशयः कथिताः।। द्वि
पदादयो न्हि निशि च प्राप्ते च संध्याद्वय इति।। वीर्योत्कटा इत्यनुव

दिने

र्तते॥ द्विपदादयो अह्नि बलिनः॥ निशि रात्रौ चतुष्पदाः। संध्याद्व
२२ ये कीटाः॥ तत्र च श्रुतकीर्तिः। मिथुनतुलकुंभकन्या दिवा बलाढ्य
न्विनश्च पूर्वार्धे॥ अजवृषसिंहाद्या रात्रौ मृगहययोः पूर्वप
श्चार्धे॥ वृश्चिकमीनकुलीरमकरांत्यार्धे च संध्यायामिति
। पूर्वार्धे विषयादया क्रतुगुणा इति॥ विषयइंद्रियाणि ता
नि च पंच बदादयः ५।६।७।८।९।१० एते सर्वे क्रतुगुणा ४ श्च
तुर्गुणिताः। २०।२४।२८।३२।४० पूर्वार्धमानं राशिबद्ध इति॥ त
एते प्रमाणे मेषादीनां व्यययाच्च तुलादीनां मानमिति॥ तथा च
सत्यः। चतुरुत्तरास्त्रिंशति भागा भवंति मेषाद्याः॥ भानाम
र्धे पूर्वमीनात् क्रमादन्ये भागव्यवहीनश्च क्षेत्रे भागैनैकेन काले २२

शयः॥ चतुर्थे कर्कटमीनौ मकरार्धे च पश्चिमे॥ विज्ञेया बलि
नो निसमेते हि जलराशयः॥ सप्तमे वृश्चिकः कीटो बलवान् परिकी
र्तितः॥ सिंह धन्व्यं सार्धाजगोसिंहा बलिनः खे चतुष्पदाः॥ अत्रा
र्धशब्देन मकरपूर्वार्धमपि गृह्यत इति॥ ॥अथ परिशिष्टस्था
नानां संज्ञांतरगणिवसंततिलकेनाह॥ केंद्रपणफरपरंपरतस्त्व
सर्वमापोक्लिमं हिबुकमंबुसुखं च वेश्म॥ जामित्रमस्तभवनं सुत
मंत्रिकोणं मेषूरणं दशममंत्र च कर्म विद्यात्॥ १८॥ ॥केंद्रात्
पणफरपरं इति केंद्रात् १।४।७।१० अपरं २।५।८।११ आपोक्लिमं
३।६।९।१२ इति संज्ञा॥ हिबुकमंबुसुखं च वेश्मा हिबुकसंज्ञा ४ मं
बु ४ सुखं चे ४ वेश्मनि चतुर्थ संज्ञा॥ जामित्र ७ मस्त ७ भवनं

दशचषका भवंति॥ यस्यां यां काले क्षेत्रे सा काले प्रमाण इति यस्मा
द्भट ब्रह्मगुप्तेनोक्तं॥ लंकासमपश्चिमप्राणेन कलौभमंडलं भ्रम
तीति॥ एवमेते भागा: दशगुणिता: चषका भवंति॥ तत्रैव जातंका
ले या घटिका सा षष्ट्याधिकेन शतत्रयेण गुणितं प्राणा भवंति।
क्षेत्रे च ता एव लिप्ता: तासां षष्ट्या भागमपहृत्य षड्भागा: क्षेत्रे
भवंति॥ एवं मेषादीनां प्रमाणभागा दशगुणिताश्चषका भवं
ति॥ तेन चषकशतद्वयं मीनमेषयो: २०० प्रमाणं एवं वृषकुंभ
यो: २४० मिथुनमकरयो: २८० कर्कधनुषयो ३२० सिंहवृश्चि
क ३६० कन्यातुलयो: ४०० एवं चषका दशविभक्ता: भागत्वेन
परिकल्पिता: यत क्षेत्रे दशभिश्चषकैर्भागो भवंति॥ ननु चर

दलवशात्प्रतिराशमन्यरूपेषुराश्युदयेषुगणितस्कंधदसिध्येषु
किमर्थमेषरूपंतदुदयप्रमाणंदर्शितमाचार्येणेत्युच्यते॥न
ष्टचिंतादिषड्वर्गपरिज्ञायपुरुषावयवानांह्रस्वदीर्घज्ञापना
योपयुज्यते॥तथाचयवनेश्वरः॥आद्यंतराशोउदयप्रमाणं
द्वौद्वौमूर्तौनियतंप्रदिष्टौ॥क्रमाक्रमाभ्यामधिपंचमंस्याच्च
क्रार्धयोर्विध्युदयप्रमाणं॥एवंप्रमाणानिग्रहाणिह्रस्वानि
मध्यानितथायतानिचक्रांगभेदैःसदृशीकृतानिमार्गप्र
माणानिविकल्पयेच्च॥अंगविभागकल्पनावक्ष्यति॥
कादिविलग्नविभक्तैर्भागात्रइति॥तत्रयस्मिन्नंगेदीर्घरवि
र्भवतिदीर्घाधिपोवाग्रहःतदंगदीर्घंभवति॥मध्ययोर्मध्यं

पाटलो धूम्रपांडुः श्चित्ररूक्षः कनकसदृशाः पिंगलः कर्बुरश्च ॥
बभ्रुः स्वच्छे प्रथमभवनाद्येषु वर्णाः प्लवत्वं स्वाम्याशाख्यं दिनक
रयुताज्ञाद्द्वितीयं च वेश्मि ॥२०॥ ॥मेषादिराशिषु यथाक्र
मं ते वर्णाः ॥ तत्र मेषो रक्तः ॥ लोहितवर्णः ॥ वृषः श्वेतः शुक्लः
मिथुनः शुकतनुनिभो हरितवर्णश्च इति ॥ कर्कटः पाटलः पाटल
पुष्पवर्णः ॥ ईषद्रक्तः पाटल इत्यर्थः ॥ सिंहो धूम्रपांडुरी
षच्छुक्लः ॥ कन्या विचित्रा नानावर्णा इत्यर्थः ॥ तुलः रूक्षः ॥ वृ
श्चिकः कनकसदृशाः सुवर्णवर्णः ॥ धन्वी पिंगला कपिलः ॥
मकरः कर्बुरा नः शुक्लकपिलव्यामिश्रवर्णः ॥ कुंभो बभ्रुः क
पिलः ॥ मीनः स्वच्छो मत्स्यवर्ण इति ॥ ॥प्रयोजनं वियोनिज

न्मज्ञाने लग्नांशकादि वक्ष्यति ॥ प्लवत्वं ॥ स्वाम्याशाख्यमिति ॥
स्वामिनः । आशा दिक् तत्र प्लवत्वं स्थाने प्लवत्वं निम्नतेत्यर्थः ॥
यथा मेषवृश्चिकयो भौमोधिपतिस्तस्य दक्षिणा दिक् तत्र
तोन्मवसंज्ञो ॥ वृषतुलयोः शुक्रस्य दिक् प्लवसंज्ञो ॥ मिथुनकं
न्ययो बुधस्तस्योत्तर दिक् प्लवसंज्ञो ॥ कर्कचंद्रस्तस्य वायवी
दिक् तत्र प्लवसंज्ञः ॥ सिंहस्यार्कोधिपस्तस्य पूर्वदिक् तत्र प्लु
वसंज्ञो ॥ धन्वीमीनयोर्जीवस्तस्यैशानी दिक् तो प्लवसंज्ञो ॥
मकरकुंभयोः सौरस्य पश्चिमा दिक् तत्र प्लवसंज्ञो ॥ एवं रा
शिस्वामिनो यद्दिक् तद्दिक् प्लवो राशिर्ज्ञेयाः हृतनष्टादिषु त
द्दिशमुखं चोरादेरन्वेष्यं ॥ यात्रायामुपयुज्यते ॥ तथा च सा

२५ रावल्यां॥ अवनाधिपतेर्नामपूर्व इह यवनैः प्रबंधतः कथितः।
तत्प्लवगो विनिहन्याद्दश्चिरेण महीपतिः शत्रूनिति॥ दिन
करयुताद्वा द्वितीयं च वेशीति॥ दिनकरः सूर्यः स्तद्युतो यो रा
शिस्तस्माद्द्वितीयो वेशिसंज्ञः॥ प्रयोजनं च यात्रायां वक्ष्यति।
वेशिर्विलग्नोपगतापि यासोरिति॥ तथा च वेशिस्थाने च सं
ग्रह इत्यादि॥ अत्र संज्ञाध्यायो या संज्ञा॥ उक्ताः ताः द्विः प्रका
रस्तत्र काश्चित्संज्ञामात्रप्रयोजनास्तत्रेमा संज्ञामात्रप्रयो
जना॥ यथा लग्नस्य होरा दुश्चिक्यं ३ हिबुकं ४ त्रिकोणं ५ द्यू
नं ७ त्रिकोणं ९ मेषूरणं १० रिःफं १२ चतुरस्रसंज्ञा ४।८ केंद्र
१।४।७।१० संज्ञा पणफर २।५।८।११ संज्ञा॥ आपोक्लिम ३।६ २५

ह्रस्वयो ह्रस्वमिति॥ तथा च सारावल्यां॥ ह्रस्वास्तिमिगोजघ
टामिथुनधनुःकर्किमृगमुख्यश्च समाः॥ वृश्चिककन्यामृग
पतिवणिजो दीर्घाः समाख्याताः एभिर्लग्नादिगतैः शीर्षप्र
भृतीनि सर्वजंतूनां सदृशानि च जीवंते गगनचरैश्चैव तुल्या
नि॥ तथा च सत्यः॥ दीर्घाश्चिवति दीर्घगृहे स्थितो वा यवदी
र्घे ह्रूद्भवति॥ एवमादिष्वर्थेते विकल्पना कार्या॥ लग्नोदयनि
रूपणं गणितस्कंधसिद्धेनेव कार्येति॥ दुश्चिक्यं सहजमिति
सहजस्य ३ दुश्चिक्यसंज्ञा। तपः ९ संज्ञाः॥ आद्यं त्रिकोणं चत
त॥ तदेव त्रिशब्दो आद्यो यस्य त्रिकोणं ९ संज्ञा इति॥ ॥
अधुना राशिवर्णान्मंदाक्रांतयाह॥ रक्तः श्वेतः शुकतनुनिभः

१।१२ संज्ञा॥ इमाश्च फलनिर्देशाः प्रयोजनमास्तत्र लग्नस्य तनुक
ल्पसंज्ञा लग्नाच्छरीरवृत्तस्यान्वेषणं· रोग्यान्वेषणं च कार्यं द्विती
स्व यस्य कुटुंबसंज्ञा च तेन तस्मात् ज्ञातिधनान्वेषणं कार्यं॥ तृतीय
स्य सहजसंज्ञा॥ तेन तस्माद्भ्रातृणां पुरुषार्थस्य चान्वेषणं का
र्यं॥ चतुर्थस्य बंधुसंज्ञा॥ वेश्म ४ सुख ४ संज्ञा तेन तस्माद्बंधुसु
खं ग्रहाणां वान्वेषणं॥ पंचमस्य पुत्र ५ बुद्धि ५ संज्ञा च तेन तस्मा
त्पुत्रबुद्ध्योरन्वेषणं कार्यं॥ षष्ठस्यारि तस्मादरीति व्रणान्वेषणं
कार्यं। सप्तमस्य दार ७ चित्तोत्थ ७ जामित्र ७ संज्ञा च तेन तस्मा
द्दारान्वेषणं कार्यं॥ अष्टमस्य मरणं ८ रंध्रं ८ संज्ञा तस्मान्म
रणं पापान्वेषणं कार्यं॥ नवमस्य शुभ ९ धर्म ९ गुरु तप ९ सं

ज्ञानपूर्वकतपोव्रतादितेनतस्मात्सितमानपूर्वकाणांतपसांचा
न्वेषणंकार्यं॥ दशमस्यआस्पद१० कर्म१० संज्ञा॥ कर्मेतितस्यक्रि
याभावान्वेषणं॥ एकादस्यभाव११ विद्याइविलासंपत्प्राप्तिअ
र्थवाचीतेनतस्मात्तयोरन्वेषणंकार्यं॥ द्वादशस्यव्यय१२ तेनत
स्माद्व्ययान्वेषणंकार्यं॥ ॥उपचयसंज्ञा ३।६।१०।११ तत्रस्थ
पापाशुभफलप्रदाभवंति॥ अपचयस्था ८।१२ पापाभावस्था
निष्टं॥ तथा चश्रीदेवकीर्त्तिः॥ सोम्याःषष्टेपापातन्वेर्ध्वेसुखा
रिधर्मधीद्युनमाः कुर्युर्भावविपर्ययंशेषापापास्तद्वृद्धिमि
ति॥ एतद्विशेषवचनेनसर्वत्रोपपत्तिष्टतइति॥ ॥इतिश्र

२७ कालात्मा दिनकृदिति॥ कालात्मा दिनकृत्सूर्यः। तुहिनरुक् हि
मेन सदृशाः शीतलाश्चंद्रः॥ सत्वं शौर्यः कुजो भौमः। ज्ञः। वचो जी
वो गुरुः। ज्ञानसुखे ज्ञानं च सुखं च ज्ञानसुखं। सितः शुक्रो मद
नः। दुःखं दिनेशात्मजः। शनैश्चरो दुःखं॥ अत्र कालग्रहणं काल
स्य सर्वगतत्वेन जगत्प्रदर्शनार्थं तत्र न केवलं कालपुरुषस्य मे
षाद्या राशयः शिरः प्रभृत्यंगभागेन स्थिताः यावदादित्यादयः
श्चात्मादिविभागेन सर्वस्य जगतः स्थिताः॥ प्रयोजनापीडिते
ग्रहदेहवंतोपि तदंगभावात्मागुणपीडनेवक्तव्यंपुष्टेपुष्टमिति।
नकेवलं यावज्जन्मनि बलवद्भिर्ग्रहैरत एव भावा आत्मादयः
शुभाश्च भवंति॥ चंद्रदुर्बलैः राजानावित्यादि॥ रविः शीतगुः नृपौ। २७

क्षितिसुतो नेता सेनापतिः॥ कुमारो बुधः युवराजा॥ सूरिर्दान
वपूजितः एतौ सचिवौ मंत्रिणौ॥ प्रेष्यः सहस्रांशुजः॥ प्रेष्यो दासः
सहस्रांशुः सूर्यः स्तज्जन्म शनैश्चरः प्रेष्योपि यस्य कर्मणा वाल
कएव प्रयोजनं॥ जन्मनि प्रश्नकाले वा बलवानुपचयस्थो ग्रहो भव
ति। तदुक्तो राजादिकः स्तस्य साधको भवति॥ अन्यथा हानिकरः॥
॥ ॥ अधुना व्यवहारार्थं सूर्यचंद्रबुधांगारकशनैश्चराणां सं
ज्ञा शालिन्याह॥ ॥हेलिः सूर्यश्चंद्रमाः शीतरश्मिर्हेम्नो विज्ञो
बोधनश्चेंदुपुत्रः॥ आरो वक्रः क्रूरदृक्चावनेयः कोणो मंदः सू
र्यपुत्रोऽसितश्च॥२॥ ॥हेलिः सूर्यसंज्ञः। चंद्रमाः शीतरश्मिः संज्ञे
बुधः हेम्नः विद् ज्ञः बोधनः इंदुपुत्रः एतास्तस्य संज्ञाः। भौमः आ

रः वक्रः क्रूरदृक् ॥ आवनेय एता संज्ञाः । सूर्यपुत्रः कोणः मंदः अ
सितः एतास्तस्य संज्ञाः ॥ ॥ अधुना गुरुशुक्रराहुकेतूनां संज्ञा
वसंततिलकेनाह ॥ जीवांगिरासुरगुरुर्वचसांपतीज्याः शुक्रो
भृगुर्भृगुसुतः सित आस्फुजिच्च ॥ राहुस्तमो गुरुसुरश्च शि
खीति केतुः पर्यायमन्यमुपलभ्य वदेच्च लोकात् ॥ २ ॥ ॥ जी
वः अंगिरः सुरगुरुः वचसांपतिः ईज्याः एता बृहस्पतेः संज्ञा ॥
शुक्रः भृगुः भृगुसुतः सितः आस्फुजित् ॥ एताः शुक्रस्य सं
ज्ञा ॥ राहुः तमः अगुः असुरः एता राहोः संज्ञा ॥ शिखी केतुः
एताः संज्ञा इति ॥ पर्यायमन्यं अन्यशास्त्रादुपलभ्य वदेत् ब्रू
यात् ॥ तथाचारावः स्तीक्ष्णांशुर्दिवाकरो भास्वत्तीक्ष्णार

ट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ राशिभेदाध्यायः प्र
थमः ॥ १ ॥ ॥ श्री ॥ ॥ अथातो ग्रहयोनिभेदो व्याख्या
यते ॥ तत्र चराचरं जगन्महमयमेव प्राक्कालाख्यस्य पुरुषस्य
कालांगानीत्येवमादिना राशिनक्षत्रमयोंगविभागः प्रदर्शितस्त
त्प्रदर्शनेन ग्रहमय एवासौ प्रदर्शितो भवति यतो राशिस्वामिनो ग्र
हा एव ॥ अधुना तस्यात्मादीन् भावा ग्रहमयानेव जगत्पालकांस्त
था राजादीन् ग्रहमयानेव च शार्दूलविक्रीडितेनाह ॥ ॥ कालात्मा
दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसुखं सितश्च
मदनो दुःखं दिनेशात्मजः ॥ राजानौ रविशीतगू क्षितिसुतो नेता कु
मारो बुधः सूरिर्दानवपूजितश्च सचिवः प्रेष्यः सहस्रांशुजः ॥ १ ॥ ॥

त्रिमभानुर्विवस्वानित्याद्यः सूर्यस्य॥ तारांकस्तुहिनगुः मृगांक
रात्रिनक्षत्रपतिरित्याद्याः श्चंद्रस्य॥ कुजो लोहितो भौमः क्ष्मातनय
इत्याद्या भौमस्य॥ सौम्यो रौहिणेयश्चांद्रो मृगांकतनयः इत्याद्या बुध
स्य। सूरिः सूरेज्य [redacted] वाक्पतिर्देवपुरोहितः इत्याद्या गुरोः॥ भार्गव उ
शना दैत्यगुरुः असुरगुरु इति॥ यमो रविजः पतंगाच्छायासूत इत्या
द्या सौरस्य। सिंहिकेयः स्वर्भानुर्दानवः अमृतचोरः विधुंतुद इत्याद्या
राहवो शिखी केतुरिति॥ ॥अधुना ग्रहवर्णानुक्तान्याह॥।
रक्तश्यामो भास्करो गौर इंदुर्नात्युच्चांगो रक्तगौरश्च वक्रः॥ दूर्वा
श्यामो ज्ञो गुरु गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः॥४॥
॥ ॥रक्तश्याममिति मिश्रपाटलपुष्पवर्ण इत्यर्थः॥ सूर्यः इंदुगौरश्चे

तप्रायः॥ वक्रः नात्युच्चो नातिदीर्घ ईषद्रक्तगौरः। ज्ञः दूर्वाश्यामः शाद्वल
त्रवालवर्णः॥ प्रयोजनं सर्वग्रहेषु जन्मनि योबलवास्तद्वर्णः स्तत्का
लजातो भवति॥ प्रश्नकाले चौरादेरपि॥ ॥अधुना ग्रहाणां वर्ण
देवतादिक् साम्य सौम्य पापत्वं चशार्दूलविक्रीडितेनाह॥ ॥वर्णा
स्ताम्रसितातिरक्तहरितव्यापीतचित्रासितावन्ह्यंबग्निजकेशवें
द्रशचिकाः सूर्यादिनाथाः क्रमात्॥ प्रागाद्या रविशुक्रलोहिततमःसौ
रेंदुवित्सूरयः क्षीणेंद्वर्कमहीसुतार्कतनया पापा बुधस्तैर्युतः॥४॥ ॥
वर्णाइत्यादि॥ ताम्रादयो वर्णाः सूर्यादि ग्रहनाथाः रवेताम्रवर्णः।
श्वेतस्य चंद्रः अतिरक्त अतिलोहितस्य भौमः। हरितो नीलवर्ण
स्य बुधः। व्यापीतस्य हरितस्य जीवः॥ चित्रस्य नानावर्णस्य शुक्रः

चयात्रायां ग्रहदेवतासंपूज्यतादिशं यायात्॥ तथा च सारावल्यां॥
ताम्रसितरक्तहरितकविचित्रासिताङ्गनादीनां॥ पावकजलगु
हजलकेशावशाक्रेशाचीवेधसः पतयः॥ पूर्वादिग्रहवास्तन्मंत्रैः
समभिपूज्यतामासां प्रस्थितः कनककगजवाहनादीन् प्राप्नोति
।नृपो याति शीघ्रं॥ प्रागाद्या इत्यादि॥ प्रागाद्या पूर्वप्रथमादिशि
तासां सूर्योदये॥ नाथाः तत्र पूर्वस्य रविः अधिपतिः॥ आग्ने
यां शुक्रः॥ दक्षिणस्यांगारकः॥ नैर्ऋत्यां राहुः॥ पश्चिमस्यां सोरः॥
वायव्यश्चंद्रः॥ उत्तरस्यां बुधः॥ ईशान्यां गुरुः॥ प्रयोजनं॥ केंद्रस्थे
ग्रहे सूतिकाद्वौरं गेहे। हतनष्टादिषु चौरादेर्गमनज्ञानं॥ क्षी
णेंदुके इति॥ कृष्णाष्टम्यर्धात् शुक्लाष्टम्यर्धं यावत्क्षीणचंद्रः

परतः पूर्णः॥ आयुर्दायविधौ कृष्णपक्षत्रयोदश्यां मावास्यांते सू
र्यमंडलतोह तस्मात्क्षीण इति॥ यस्माद्भुवनेश्वरः॥ चंद्रस्य पा
पलं कदाचिदपीच्छति॥ तद्वाक्यं॥ मासे तु शुक्लप्रतिपत्प्रवृत्ते पूर्ण
शशी मध्यबलो दशाहे॥ श्रेष्ठो द्वितीयेल्पबलस्तृतीये सौम्यैश्च
दृष्टो बलवान्सदैव॥ तथा च क्रूरग्रहार्कजकुजसूर्या पापाः शुभा
शुक्रशशांकजीवाः॥ सौम्यास्तु सौम्यो व्यतिरिक्तमिश्रितोन्यैः व
र्गैस्तु तुल्यं प्रतिमत्वमेति॥ तस्मादेतावत्क्षीण इति॥ अर्कांगारः
सोरः एते पापाः बुधस्तैर्युतः स्तेषामेकतमेन युक्तः पापएव॥
शेषाः सौम्याः शुक्लाष्टम्यर्धात् कृष्णाष्टम्यर्धं यावत् चंद्रः सौम्यः
बुधः पापवियुतः सौम्यएव॥ जीवशुक्रौ सदैव सौम्याविति प्रयो

३१ जनं॥ पापसौम्यग्रहबलोज्ज्ञातः पापात्मकः सौम्यस्वभावश्च भवति
॥ ॥ अधुना ग्रहाणां प्रवृत्तिविभागं महाभूताधिपत्यं चोपछं
दसिकेनाह॥ बुधसूरसूतौ नपुंसकाख्यौ शशिशुक्रौ युवती
नराश्च शेषाः॥ शिखिभूखपयोमरुद्गणानामधिपा भूमिसु
तादयः क्रमेण॥ ६॥ ॥ बुधसूर्यसितावितिः॥ बुधः शनैश्च नपुंस
कनामानौ शशिशुक्रौ एतौ युवतीस्त्रीसंज्ञौ॥ शेषा रविभौमजी
वा नराः पुरुषसंज्ञाः॥ प्रयोजनं॥ जन्मनि चिंतायां हृतनष्टादि
षु बलवंतः स्वपक्षमेव कुर्वंति॥ एषामुपतापः शिखिभूख
पयोमरुद्गणानामिति॥ शिख्यादीनां पंचानां महाभूता
नां भूमिसुतादयः क्रमेणवशिनः॥ तद्यथा शिखिनः अंगार

३१

असितस्य कृष्णवर्णस्य सौरः॥ प्रयोजनं बलवति ग्रहे हृतनष्टादि
द्रव्यवर्णज्ञानं॥ जन्मनि प्रश्नकाले चोक्तस्य द्रव्यलाभः॥ अन्यथा
हानिः॥ ग्रहपूजायां तद्वर्णकुसुमपूजा॥ तथा याज्ञवल्क्यः॥ बलौ मं
डलकेषु चेति॥ वन्हीत्यादि॥ सूर्यादिनाथा इत्यनुवर्तते॥ आदित्य
स्य वन्ही अग्निनाथे स्वामी॥ चंद्रस्यांबु जलं भौमस्याग्निजः कुमा
रः॥ बुधस्य केशवो विष्णुः गुरोरिंद्रः शुक्रस्य शची इंद्राणी॥ सौरस्य
कः प्रजापतिः प्रयोजनं॥ ग्रहपूजायां ग्रहोक्तदेवतापूजा॥ तथा च
यवनेश्वरः॥ देवा ग्रहाणां जलवन्हिविष्णुप्रजापतिस्कंदमहेंद्रदे
व्याः॥ चंद्रार्कचांद्यकूजभौमजीवशुक्राश्च यज्ञेयो जेतरा स्वतः॥
तथा च चोरमानमानयने बलवद्ग्रहोक्तदेवतापर्यायनामा॥ तथा

कोवशीभौमास्वामीत्यर्थः॥एवंभूमेबुधः॥आकाशस्यजीवः
पयःअंभसःशुक्रः॥मरुतोवायोशनैश्चरः॥गगनवृत्तपूर्णार्थः॥
नन्वादित्यश्चंद्रयोःपूर्वमेवोक्तंवन्ह्वंबुवशित्वमिति॥प्रयोज
नं॥स्वदशायांमहाभूतरूतांछायांव्यंजयतिवक्ष्यतिचाछायां
महाभूतरूतांचसर्वदृसादि॥ ॥अधुनाग्रहाणांब्राह्मणा
दिवर्णाधिपत्यंगुणविभागंचोपजातिकयाह॥विप्रादितःशु
क्रगुरूकुजार्कौशशीबुधश्चेत्यसितोंत्यजानां॥चंद्रार्कजीवा
ज्ञसितौकुजार्कीयथाक्रमंसत्वरजस्तमांसि॥७॥ ॥विप्रा
दितोवर्णचतुष्टयादीग्रहाःअधिपतयः॥शुक्रगुरूब्राह्मणा
धिपती॥कुजार्कौक्षत्रियाधिपती॥शशीबुधःशूद्राधिपती

असितः अंत्यजानां चांडालादीनां अधिपतयः॥ प्रयोजनं हृत
नष्टादिषु ग्रहबलाचोरादीनां ग्रहोत्थवर्ण प्रभवः॥ एषामुपघा
तः॥ तथा च सत्यः॥ गुरुशुक्रौ रविवक्रौ चंद्रः सौम्यः ज्ञानैश्चरः
विप्रक्षत्रविट्शूद्रः संकराणां प्रभुत्वकराः॥ अजयेजयेच अ
प्रताविततनाशे नेलाभे तस्य स्तेभ्यः कुर्युः गुणांश्च दोषांश्च प
क्षांस्तान्॥ चंद्रार्कजीवा इत्यादि। चंद्रार्कजीवा एते सत्वगुणाः
ज्ञसितः रजसंज्ञौ। कुजार्किः तमःसंज्ञौ॥ प्रयोजनं॥ सत्वरज
स्तमो वा त्रिंशांशो यस्य भास्करस्तादृगिति अन्ये पुनर्बलव
द्वर्णयति॥ तथा च श्रीकीर्त्तिः॥ बलवद्भिस्तद्गुणोभवेज्जात
कृति॥ अत्राचार्यस्य यवनेश्वरेण सह मतभेदः अंगीकृतं

बृ० ज्या०

३२ रत्तारुत्रावर्तलांगइति॥ बहुवातकफः प्रभूतमारुतः श्लेष्मा॥ प्रा
ज्ञोमेधा॥ मृदुवाक् कोमलभाषी शुभदृक् शुभदर्शनी एवंविधः
श्चंद्रः॥ ॥अथांगारकबुधयोः स्वरूपं स्वागतयाह॥ क्रूरदृ
क् तरुणमूर्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः॥ श्लिष्टवाक्
सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च॥९॥ ॥क्रूरदृंगो
रकः सततरुणमूर्त्तिः नित्ययौवनायेताकारविग्रहः॥ उदारोदा
ता॥ पैत्तिकः पित्तबहुलः सुचपलोऽस्थिरचित्तः कृशमध्यः स्त
नूदरः एवंविधोंगारकः॥ श्लिष्टवाक् इति श्लिष्टवाग्मी हृदभा
षी सततहास्यरुचिः॥ नित्यं परिहासशीलः पित्तमारुत
कफप्रकृतिः दोषत्रयोल्बणस्वभावः एवंविधो ज्ञो बुधः॥ ॥

३२

अथजीवभृग्वोः स्वरूपं वंशस्थेनाह॥ ॥बृहत्तनुः पिंगलमूर्ध
जेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः॥ भृगुः सुखी कांतवपुः
सुलोचनः कफानिलात्मासितवक्रमूर्धजः॥१०॥ बृहत्तनुरिति॥
बृहत्तनुर्यस्य स्थूलशरीरः॥ ऊर्ध्वजेक्षणो पिंगलकेशः कातरा
क्षश्चेति॥ श्रेष्ठमतिः धर्मानुगप्राज्ञः कफात्मकः श्लेष्मात्मा एवं
विधो बृहस्पतिः॥ भृगुरित्यादि॥ सुखी नित्यं सुखासक्तः॥ कांत
वपुः दर्शनशरीरः सुलोचनः शोभनाक्षः॥ कफानिलात्मा श्लेष्म
मारुतप्रकृतिः असितवक्रमूर्धजः कृष्णा वक्राः कुंचितकेशाइत्यर्थः
एवंविधो भृगुः॥ ॥अधुनाशनैश्चरस्वरूपं स्नायादिसार
वेचग्रहाश्रयं चैव संततिलकेनाह॥ ॥मंदोलसः कपिलदृक् कृश
दीर्घगात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा॥ स्नाय्वस्थ्यस्त

कृत्वगथशुक्रवसाचमज्जामंदार्कचंद्रबुधशुक्रसुरेज्यभौमाः
॥११॥ ॥मंदइति॥अलसः क्रियास्वपटुः कपिलदृक्पिंगा
क्षः॥कृशोदुर्बलदीर्घमुच्चतरंगात्रंगात्राणिवा दुर्बलोदेहः॥स्थू
लद्विजो दृढदंतः॥परुषरोमकचः रूक्षतनुरूक्षकेशः।अनिलात्मो
वातप्रकृतिः॥एवंविधोमंगलस्नायिवस्थीत्यादि॥ ॥मंदादी
नांग्रहाणांस्नाय्वादिसारत्वेस्नायस्थीनिप्रसिद्धार्थैति॥देह
वतांशनैश्चरादित्यो।स्नायुर्मंदः॥अस्थ्यान्यर्कः।असृक्रुधिरं
चंद्रमाः।त्वक्चर्मतद्बुधः।आर्तर्योशुक्ररेतसः स्तच्छुक्रः॥वसा
मेदस्तत्सुरेज्यः॥मज्जाअस्थ्यंतर्गतोधातुर्विशेषः।सभौम
ग्रहरूपज्ञानप्रयोजनंलग्ननवांशपतुल्यतनुस्यादित्यत्रोपयु
ज्यते॥जन्मकालेयोग्रहेबलवान्स्तत्सदृशितरूपःस्तत्कालजातो

सस्समतमिति॥अथगुणास्वरूपंयः सात्विकस्तस्यदयास्थि
रत्वंसत्यार्जवंब्राह्मणदेवभक्तिः॥रजोधिकः कलाकृत्स्त्रीसं
सक्तचित्तः पुरुषत्तिशूरः तमोधिकंवंचयेइतापरेषांमूर्खो
ऽलसक्रोधपरोतिनिद्रः॥ ॥अधुनाअर्कचंद्रयोस्वरू
पंतोटकेनाह॥ ॥मधुपिंगलदृक्चतुरस्रतनुःपित्तप्रकृति
सवितात्यल्पकचः॥तनूवृत्ततनुर्बहुवातकफः प्राज्ञश्चशशीमृ
दुवाक्शुभदृक्॥८॥ ॥मधुपिंगलादृगिति॥मधुवत्पिंगला
दृष्टिर्यस्यईषत्कातराक्षः चतुरस्रतनुःप्रसारितभुजद्वय
प्रमाणसमोच्छ्रायः पित्तप्रकृतिः पित्ताधिकः।अल्पकचोवि
रलकेशः एवंविधःसविता॥ तनुवृत्ततनुरित्यादि॥तनु

भवति॥ तर्हीतुसारसश्वहृतनष्टादिषु प्रश्नकालेप्येवं विदधातु
रूपाश्चोरादयः॥ व्याधितप्रश्ने यल्लग्नेयश्चनवांशाकालग्नेवर्त्तते त
त्स्वामिनोबलवशादभिहितदोषभवापीडा॥ ॥अधुनाग्रहाणां
स्थानवस्त्रप्रश्नत्वं शार्दूलविक्रीडितेनाह॥ ॥देवांबाग्निविहारको
शशायनाक्षितिस्युक्तरेशाः क्रमाद्वस्त्रे स्थूलमभुक्तमग्निकहतं मध्यं
दृढंपाटितं॥ तांत्रेस्यान्मणिहेमयुक्तरजतांअर्काच्चमुक्तायसीद्वेका
लोत्रिशिरादयः शात्रिकुचेंशग्वादिषूद्यस्तु वा॥१२॥ ॥देवांबु
ग्निरिति अर्कादीनांग्रहाणांक्रमादेवादीनस्थानानि तत्रदेवता
स्थानमादित्यस्य अंबुस्थानंचंद्रमसः। अग्निस्थानंभौमस्यवि
हारस्थानंक्रीडास्थानंबुधस्यकोशोभांडारागारंतस्थानंगुरोः

शयनस्थाने शुक्रस्य॥ क्षित्युत्करः अवकरराशिः तत्स्थाने शनैश्चरस्य
एषां स्थानानां एतत्स्वामिनः॥ प्रयोजनं बलवति ग्रहो सुहृत्स्थाने प्रस
वज्ञाने॥ हृतनष्टादेः श्चोरादेः तदेव द्रष्टव्यस्य वा॥ वस्त्रमित्यादि
अर्कादिति सर्वत्रानुवृत्तिः॥ तत्र स्थूलं तंतुमादित्यस्य॥ अभुक्तं न
वं चंद्रस्य॥ अग्निनाहतमेकदेशादग्धं भौमस्य॥ केनाबुनाहतक्लि
न्नं बुधस्य॥ मध्यंम्नाति जीर्णं गुरोः॥ दृढं कालं तत्स्थायी शुक्रस्य॥
पाटितं जीर्णं शनैश्चरस्य॥ प्रयोजनं सूतिकावस्त्रज्ञाने हृतनष्टा
दिचिंतायां बलवद्ग्रहवशाद्वस्त्रज्ञानं॥ ताम्रं स्यादित्यादि॥ आदि
त्यस्य ताम्रं॥ चंद्रमसो मणिमयः॥ भौमस्य हेम सुवर्णं॥ बुधस्य यु
क्तिः युज्यते इति युक्तिः तारिकास्यादि॥ रजतं बृहस्पतेः॥ स्वस्थान
स्थस्य सुवर्णमपि मुक्ता शुक्रस्य॥ आयसं त्र लोहं सीसं त्रपु नीच

३६ पलक्षितः शुक्रस्तस्मिन्वसंतः॥ ककारोपलक्षितः रुधिरजो भौमः
स्तस्मिन्ग्रीष्मः॥ चकारोपलक्षितश्चंद्रस्तस्मिन्वर्षाः॥ ज्ञः स्तस्मि
न्शरत्॥ गुकारोपलक्षितः स्तस्मिन् गुरोः हेमंतः॥ आदित्यपु
दयति ग्रीष्मः॥ तथा च बादरायणः॥ ग्रीष्ममष्ट प्रवदंति कुजार्का
विति॥ द्रेक्काणैरित्यस्य द्रसते न संबद्धः॥ द्रेक्काणेश्चोदयद्भिः शा
नैश्चरादिसंबंधिभिः शिशिरादयो ज्ञेयः एतदुक्तं भवति॥ ल
ग्ने ग्रहाः संभवंन शानैश्चरद्रेक्काणे लग्नगति शिशिर एवं शुक्र
द्रेक्काणो वसंतः सोमग्रीष्मः रविद्रेक्काणे ग्रीष्मः। चंद्रवर्षाः बुधे
शरत्॥ जीवे हेमंतः। अत्र मुख्योदयेन तु निर्देशः॥ तदभावे
द्रेक्काणेन बहुनामुदयेपि द्रेक्काणे नैव केचिद्बहूनामुदये बलज्ञ ३६

हेणेति व्याचक्षते॥ तथा च मणित्थः॥ लग्नोपगतैर्यो बलवास्त
दृतुनिर्देश इति तत्रैव ज्जातलग्ने यो ग्रहस्थितस्तदुक्त ऋतुर्वाच्यः
बहुषु लग्नगतेषु यो बलवान् ग्रहाभावे द्रेक्काणपतेः ऋतुनिर्देशः
प्रयोजनं॥ नष्टजातके ऋतुनिर्देश हृतनष्टचिंता याचेति आचा
र्येण वर्णाधिपत्यमनुक्तं॥ उक्तं च स्वल्पजातके॥ ऋगाथर्वसामय
जुषामधिपा गुरुसौम्यभौमसिताः॥ ऋग्वेदाधिपे गुरुः। यजु
र्वेदाधिपः शुक्रः सामाधिपो भौमः अथर्वाधिपो बुधः। प्रयोज
नं बलवति शाखाधिपे ब्राह्मणो जातः स्तच्छाखापाठको भवति
॥ ब्राह्मणे चोरजाते शाखाद्विजानां॥ अनिष्टस्थानस्थे ग्रहे त
न्मंत्रे शांतिरिति॥ ॥अथ ग्रहाणां दृष्टिस्थानानि निसर्गदृष्टि

फलानि च प्रहर्षिण्याह॥ ॥त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोक
३७ यंति चरणाभिवृद्धितः॥ रविजामरेज्यरुधिराः परे च ये क्रमशो भवं
ति किल वीक्षणेऽधिकाः॥१३॥ ॥यस्मिन्स्थाने ग्रहा स्थितास्तत्त्रिद
शादीनि स्थानानि चरणाभिवृद्धितः पाददृष्ट्यावलोकयंति॥ ग्रहो य
स्मिन्राशौ स्थितः स्तस्माद्यः स्तृतीयग्रहोऽस्ति दशमश्च तथा तृतीय
दशमस्थौ राशी यतो पादेन चतुर्भागदृष्ट्यावलोकयति॥ एवं त्रिको
णस्थौ नवपंचमस्थाने अर्धदृष्ट्या॥ चतुरस्रेऽष्टमचतुर्थे ८।४ पा
दहीनदृष्ट्या ७ सप्तमगो संपूर्णदृष्ट्या चरणाभिवृद्धितः॥ पाददृष्ट्ये
दहीनदृष्ट्या पश्यति तावत्फलं पश्यति॥ तथा च स्वल्पजात
स्यार्थः यावत्पाददृष्ट्या पश्यति तावत्फलं पश्यति॥ तथा च स्वल्पजात
के॥ दशमतृतीये नव९पंचमे चतुर्थाष्टमे कलत्रे च पश्यंति पाद
दृष्ट्या फलानि चैवमपयच्छंति॥ अर्थादेव ग्रहोऽनुक्तस्थानानि न पश्य ३१

शनैश्चरस्य॥ तथा तेनैव सूक्ष्मजातके उक्तं॥ अर्कादितान्नमणिहेम
शुक्तिरजतानि मौक्तिकलोहे वक्तव्यं बलवद्भिः स्वस्थाने हेम जीवेपि
॥ तथा च बादरायणः॥ अर्कस्य ताम्रं मणयो हिमांशोः भौमस्य हेमें
दुसुतस्य शुक्तिः॥ जीवस्य रौप्यं स्वगृहे स्थितस्य तस्यैव हिमांशुने
श्च मुक्ताः॥ तीक्ष्णं भृगुदेहप्रभवस्य सीसं कृष्णायसं त्रपु वदंति च
संज्ञाः॥ प्रयोजनं सूतिकागृहे बलवद्ग्रहद्रव्यस्तनाहृतेन स्पादिचिं
तायां च द्रव्यनाशादिपरिज्ञानं तच्छुभदशायां तस्मिन्नुपचयस्थे
च तत्प्राप्तिः॥ उक्तवैपरीत्ये हानिः॥ द्रेक्काणैरित्यादि दशशुक्लचंद्रगवा
दिभिः पर्यंतैर्वर्णैः संज्ञा येषां शनैश्चरप्रभृतीनां निर्दिष्टाः कृतः सु
लग्नगतेषु त्रिंशांशादयः षड्ऋतवो ज्ञेयाः तत्र दृकाणोपलक्षितः
शनैश्चरस्तस्मिन्नुदयति लग्नस्थे त्रिंशांशे ऋतुर्ज्ञेयः॥ शुक्रो

तीति सारावल्यां॥ सव्ये पश्यंति सदा ग्रहाश्चरणादिवृध्धितः स
र्वे त्रिदशत्रिकोणचतुरस्रसप्तमगा॥ ता फलक्रमेणैव पूर्णं पश्यंति
रविजस्तृतीयदशमे त्रिकोणमपि जीवः। चतुरस्रं भूमिसुतः सि
तार्कबुधहिमकराः कलत्रं च॥ तथा च यवनेश्वरः। द्वौ पार्श्वमो षष्ठ
मथ द्वितीयं संस्थानराशेः परिहृत्य राशीन्॥ शेषान्ग्रहः पश्यति
सर्वकालमिष्टेषु चेषां सहितो द्वृतिष्ठा॥ जामित्रभे दृष्टिफलं सम
ग्रं स्वपादहीनं चतुरस्रयोश्च। त्रिकोणयोर्दृष्टिफलार्धमाहुः दुश्चि
क्यसंज्ञे दशमे च पादं॥ रविजामरेज्यरुधिर इति॥ किंलेत्यागम
वचनं॥ चरणाभिवृध्धित इत्यनुवर्तते। रविजादयः श्चरणाभि
वृध्धितः। रविजः पादफलप्रदः॥ अमरेज्यार्धफलदः। रुधिरो पाद

३८ हीनफलदः॥ एतैर्नैसर्गिकं ग्रहाणां दृष्टिफलं स्थानवशादेतेषांय
थास्थं दृष्टिफलमूह्यं॥ एवमेके व्याचक्षते॥ अपरे चाहुः स्थानफ
लमेतत् तेन त्रिदशादिस्थानगतानुग्रहगराशीन् पश्यानो दर्शि
नेधिकेफलप्रदा भवंति॥ तद्यथा॥ तृतीयदशमस्थितान् ग्रहरा
शीन् शनैश्चरः पश्यन्नन्यग्रहेभ्यो अधिकफलप्रदो भवति॥ परि
पूर्णं पश्यंतीत्यर्थः॥ एवं त्रिकोणस्थो जीवः॥ चतुरस्रगान् भौमः॥
सप्तमस्थान् सूर्यचंद्रबुधशुक्राः॥ एतच्च बहुतराणामाचार्याणां
मतं॥ तथा च भगवान् गार्गिः॥ दुश्चिक्यदशमगान् सौरस्त्रिकोण
स्थान् बृहस्पतिः॥ चतुर्थाष्टमगान् भौमः॥ शेषाः सप्तमसंस्थिता
न्॥ भवंति वीक्षणे नित्ययुक्ताधिकफलग्रहाः॥ ॥ अधुना ग्रहा ३८

३९ कालोपाकपतिर्वक्ताद्वक्तव्यः॥ अथाच मतांतरं लग्नेपाकपतिस्तुल्यः
कालोलग्नोदितांशसमसंख्यः॥ वक्तव्यो रिपुविषयगर्भाधानेथका
र्यसंयोगे॥ कुतूहलवतेति॥ भास्करादिभ्यः कटुकादिरसनिर्देशः
॥ तत्रादित्यस्य कटुकरसः॥ चंद्राल्लवणस्य॥ भौमात्तिक्तस्य॥ बुधा
न्मिश्रस्य॥ निंबादिकटुकमरीचादिषड्रसस्य॥ जीवान्मधुरस्य॥
शुक्रादाम्लरसस्य॥ सौरात्कषायस्य॥ प्रयोजनं॥ आधानकाले
यो बलवांस्तदुक्तरसदोहदो गर्भिण्या भवति॥ तथाच सारावल्यां
मासाधिपस्त्री दोहदको ज्ञायतेवश्यं॥ मासाधिपस्य भावे लग्न
गयोगाद्द्विभिः श्चिंत्यं॥ भोजनाश्रये च प्रश्ने ग्रहोदये तन्नवांशकोद
येवा॥ तदुक्तरसान्वितं भोजनमिति॥ ॥ अधुना मित्रामित्रवि ३९

भेदाद्भूलविक्रीडितेनाह॥ ॥ जीवो जीवबुधौ सितेंदुतनयौ व्यर्का वि
भौमाः क्रमाद्वींदुर्का विकुजेंद्विनाश्च सुहृदः केषांचिदेवं मतं॥ सत्योक्ते
सुहृदस्त्रिकोणभवनात्स्वात्स्वांत्यधीधर्मपाः स्वोच्चोरिः सुखपाः
स्वलक्षणविधिर्नान्यैर्विरोधादिति॥१५॥ ॥ सूर्यादीनां ग्रहाणां
क्रमाज्जीवादयः सुहृदः॥ तत्रादित्यस्य जीवः सुहृन्मित्रं जीवबुधौ
चंद्रस्य गुरुसौम्यौ॥ सितबुधः एतौ भौमस्य व्यर्काः सूर्यो येभ्यस्ते
ग्रहाः सूर्यवर्जिताः॥ एवं बुधस्य रविकुजाः वेगतोगारकोः सर्वे एवं बृ
हस्पतेः विंदुर्का विगतश्चंद्रार्कः सर्वे एवं शुक्रस्य॥ विकुजेंद्विना॥ कुजः
इंदुः इन एते विना॥ सर्वे सौरस्य॥ एवं केषांचिन्मतं न बहूनां अत्रं च
तेषांत्रानुमित्रव्यवहार एवेष्टोदासीनव्यवहारस्तस्मान्मित्रेभ्योन्य
अमित्राणीति केचिद्यवनेश्वरादयः॥ तथाच॥ रवेर्गुरुमित्रमतोन्य

४० थान्ये गुरोस्तु भौमं परिहृत्य सर्वे चांद्रेवनार्कौ शशिनंदनस्याव्यर्केंदुवर्जं
सुहृदः प्रतिष्ठाः॥ भौमस्य शुक्रस्य शशिजश्च मित्रे रवौ बुधं देवगु
एव रुं च विद्यात्॥ सौरस्य मित्राणि कुजेंदुसूर्यास्त्रोषान्न प्रहिद्विनत्रं
च तद्वत्॥ सत्योक्ता इति॥ सत्योक्ते होराशास्त्रे स त्रिकोणभवनादारभ्य
मूलत्रिकोणराशेः स्वात्ययधीधर्मपाः स्वोच्चायुः सुखपाः एते ग्रहस्य
सुहृदो भवंति तत्र त्रिकोणं तत्र द्वितीयराश्याधिपः तस्मादेवांत्य १२॥
स्थानाधिपः धीः ५ स्थानस्य पंचमस्थानाधिपः धर्मपो९ नवमाधि
पः स्वोच्चयो ग्रहात् स्वोच्चस्वामी आयुषोष्टमस्थानाधिपः सुख४
स्थानाधिपः ग्रहा मित्रं भवति॥ स्वलक्षणविधिविरोधादन्येरप
ठितस्थानाधिपतिभिर्ग्रहैः सहनायं मित्रामित्रविभागः कल्पनी ४०

यः कालनिर्देशं चैवेतालीयेनाह॥ ॥अयनक्षणवासरर्तवो मा
सार्द्धं च समाश्च भास्करात्॥ कटुकलवणतिक्तमिश्रिता मधुराम्लौ
च कषाय इत्यपि॥१४॥ ॥भास्कराद्ग्रहस्ययनादिकालनिर्देशः॥
तत्रायननिर्देशो भास्करात्॥ क्षणो मुहूर्तः स्तं निर्देशः ~~शुक्रा समाः~~
श्चंद्रात्॥ वासरो दिवसस्तं निर्देश भौमात्॥ ऋतुनिर्देशो बुधात्॥
मासनिर्देशो जीवात्॥ अर्द्धं पक्षः स्तं निर्देशः शुक्रात् समाः संवत्स
रस्तं निर्देशः सौरात्॥ प्रयोजनं॥ प्रश्नकाले यस्य ग्रहस्य नवांश
को दयः स ग्रहस्तस्मान्नवांशकाद्यावत्संख्य नवांशो भवति तत्संख्यो
यनादिको ग्रहोपलक्षितकालः शुभाशुभफलपक्तो वाच्यः॥ अन्ये
चैवं व्याचक्षते॥ यावत्संख्यानवांशाके उदितास्तावत्संख्यायनादि

यः विरोधाद सुहृत्वंस्वचतेल्लक्षणंलक्षणो विधि॥ तेन विरोधस्तस्माद
तदुक्तं भवति॥ अतोन्यस्थानाधिपाये ग्रहाः स्त ग्रहस्य सुहृदो न भवंति॥
तथा च सत्यः॥ सुहृदः स्त्रिकोणभवनाद्ग्रहस्य सुतभे व्ययेथ धनभव
ने॥ स्वजने ४ निधने ८ धर्मे स्वोच्चभवनोज्ञेयाः॥ ५।१२।२।४।८।९
तत्र द्विराश्यधिपो मित्र संज्ञः॥ एकराश्यधिपो मध्यमः॥ अनुक्तस्था
नाधिपो रिपुः॥ वक्ष्यिति चाद्वकानुत्कभयान् सुहृत्समरिपून्स चिंत्यने
सर्गिकान्नि॥ ति॥ एकराश्यधिपो मध्यस्थइत्तियदुक्तं तथा चंद्रार्का वेकरा
श्याधिपावपि मित्र संज्ञोभवंतः॥ तयोर्हि राशिद्वयस्या स्याधिपाभा
वात् एवं उच्चराश्यधिपत्वात् एकस्यवत्वं प्राप्नोति तथापि द्विषप एवज्ञा
तव्यः॥ एतत्वमदानुवियुपादानार्थं स्पष्टतरं व्याख्यायते॥ तद्यथा॥
आदित्यस्य सिंहः त्रिकोणं तस्माद्द्वादशस्थानस्य कर्कटस्य चंद्रमा

बृ॰जा॰व्या॰ ग्रहयोनिभे॰

४१

धिपः स एकराश्यधिपो पि द्वितीयराश्यधिपत्याभावात् रवे मित्रं सिं
हाश्चतुर्थो वृश्चिकनवमो मेषः तयो भौमः॥ आदित्यस्योच्चं मेषः सिं
हनवमत्वात् एकराशिपत्वादादित्यस्य मित्रं सिंहा कन्या मिथुनौ बुधः
तत्र द्वितीयस्थानस्योक्तत्वात् ११ अनुक्तं रवे मध्यः सिंहात् ३।१०। तयो

र	चं	मं	बु	गु	शु	श	
चं मं गु	र बु	चं र गु	र शु	र मं चं	श बु	शु बु	मित्राणि
बु	मं शु गु श	शु	मं गु श	श	गु मं	गु	सम मित्राणि
शु श	०	बु श	चं	बु शु	र [illegible] चं	र चं मं	शत्रू

धिपः शुक्रः अनुक्तस्थानत्वात् ३।१०। आदित्य
स्य शुक्रः शत्रुः सिंहात् ६।७ अनुक्तस्थाने र
वेः शने शत्रुः॥ अथ चंद्रस्य चंद्रस्य वृषः ४।२
रविः स एव राश्याधिपो रवेः मित्रं वृषात् २।५
तयो बुधः उक्तस्थानान्मित्रं वृषात् ७।१२ तयो
भौमः १२ उक्तत्वात् ७ अनुक्तत्वान्मध्यः वृषा
त् ८।११ तयो गुरुः अनुक्त ११ स्थान तयो मध्यः ४१

४२ तुकशत्रुः तुलात् १० चंद्रः शत्रुः तुलात् ९।१२ उक्तलात् बुधः मित्रं ॥ ॥
अथ सौरस्य कुंभस्त्रिकोणं ५।८ बुधः उक्तलान्मित्रं कुंभात् ५।१ शुक्रः
मित्रं कुंभात् २।११ उक्तानुक्तलात् मध्यः कुंभात् ९ चंद्रः शत्रुः भात् ७
रविः शत्रुः कुंभात् ३।१० भौमः अनुक्तलात् सौरस्य शत्रुरिति ॥ ॥
अधुना सत्योक्तानिद्देकानुक्तयानु ग्रहस्य सुहृन्मध्य[illegible] शत्रून् स्थः
शार्दूलविक्रीडितेनाह ॥ ॥ शत्रू मंदसितौ समश्च शशिजो मित्राणि
शेषा रवेः स्तीक्ष्णांशो हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ॥
जीवेंदूष्णकराः कुजस्य सुहृदौ ज्ञोरिः सितार्की समौ मित्रे सूर्यसितौ बु
धस्य हिमगुः शत्रुः समश्चापरे ॥१६॥ सूरेः सौम्यसितावरी रविसु
तो मध्योपरे त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषा
वरी ॥ शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयो ये प्रोक्ताः सु ४२

हृत्स्त्रिकोणभवनात्ते मे मया कीर्तिताः ॥१७॥ ॥ शत्रू मंद इति ॥ रवेः मं
दसितौ एतौ शत्रू ॥ शशिजः समः मध्यस्थः ॥ शेषा ग्रहाः चंद्रांगारकगु
रवो मित्राणि एति ॥ तीक्ष्णांशु रिति ॥ शीतगोः चंद्रस्य ॥ रविः हिमरश्मि
जः बुधः एतौ सुहृदौ शेषाः समा इति ॥ जीवेंदूष्णकराविति ॥ कुजस्य जी
वः इंदुः उष्णकराः सूर्यः एतौ सुहृदः ॥ ज्ञः बुधः अरिः ॥ सितार्कि समौ त्र
मित्रे इति ॥ बुधस्य ॥ सूर्यसितौ सुहृदौ ॥ हिमगुः शत्रुः ॥ अपरे अन्ये भौ
मगुरुसौरिः शुक्रे ज्ञौ सुहृदौ ॥ मित्रे सुरगुरु समः ॥ अन्ये रविशशि
भौमाः अरयः शत्रवः ॥ ये प्रोक्ता इति ॥ ये मया स्वत्रिकोणाद्विपूर्व
त्रिकोणभवनात् ॥ स्वस्वाध्यायी धर्मपादस्यादिना ग्रंथेनोक्त ॥ स्त एवे
ह प्रविभज्य पुनर्भूयः प्रकीर्तिताः ॥ उदाहरणत्वेन प्रदर्शिता इति ॥ ए
वं नैसर्गिकमित्रामित्रमध्यस्ता विभागः प्रोक्तः ॥ ॥ अधुना तात्कालि
कमित्रामित्रभागं शार्दूलविक्रीडितेनाह ॥ ॥ अन्योन्यस्य धनव्यया

बृ०ज्जा० व्या०ग्रहयो०

२

४३

यसहजव्यापारबंधुस्थिताःस्तत्कालेसुहृदःस्वतुंगभवनेप्येकेरयस्त्वन्यथा॥
देकानुकूलभपान्नसुहृत्समरिपून्संचिंत्यनेसर्गिकांस्तत्कालेचपुन
स्तूतानधिसुहृन्मित्रादिभिःकल्पयेत्॥१८॥ ॥अन्योन्यस्येति॥परस्प
रमतेषुधनादिषुग्रहस्यग्रहाव्यवस्थितास्तत्कालेजन्मनियात्रायांवि
वाहप्रश्नेवासुहृदोमित्राणिभवंति॥धनस्थाने॥व्यय१२आय११सहज३
व्यापार१० बंधु४स्थानंएतेषुयोग्रहस्थितस्तत्रयस्याग्रहाव्यवस्थि
तस्तस्यसुहृन्मित्रंभवति॥सचतस्यापियउक्तमन्योन्यस्येतिसतुं
गभवनेप्येकइतिएकेन्येपुनराचार्याःग्रहस्यचस्वोच्चेयोग्रहस्थितः
सयस्याप्रस्थितस्वतत्काल्लमित्रमिच्छति॥तच्चयवनेश्वराद्यः॥त
थाचतद्वाक्यंमुलत्रिकोणाद्धनेर२बंधु४कर्म१२पुत्र५व्यय१२स्था
नमताग्रहेद्राःतत्कालमेतसुहृदोभवंति॥स्वोच्चाधिपायस्य

४३

वृष११७अनुकूलस्यात्तुलस्थ८उक्तलात्तयोर्मध्यःवृषः९१०शनिर्मध्यस्थः
एवंचंद्रस्य॥भौमस्यमेष१४चंद्रउक्तःमित्रंमेष५रवेःमित्रंमेष३१९अनुक्त
स्थानात्बुधःशत्रुमेष१९१२उक्तस्थानान्मित्रंमेषात्२१७शुक्रअनुक्तला
त्मध्यमेषात्१०११अनुक्तस्थानात्शनेःशत्रुः॥ ॥अथबुधस्यकन्या
मूलत्रिकोणं८१२२रविबुधस्यमित्रं।कन्या२१९उक्तलान्मित्रंकन्या३१८भौ
अनुक्त२लात्मध्यः।कन्या४१७गुरुउक्तानुक्तलान्मध्यःशुक्रकन्या५१६तयो
र्मध्यःशनिःकन्या११अनुक्तलात्शत्रुचंद्रः॥ ॥अथगुरोःधन्विमूलत्रि
कोण५१९रवेरुक्तस्थानलान्मित्रं।धन्वि८चंद्रःउक्तलान्मित्रंधनुः५१२
भौमःउक्तलात्मित्रंधनुषः२१३सौरःउक्तानुक्तलात्मध्यः।धनुषःष
ष्ठ६११अनुक्तलात्शत्रुःधनुषः७१०अनुक्तलात्शत्रुबुधः॥ ॥अ
थशुक्रस्यतुला४।५त्रिकोणंशनिःउक्तस्थानान्मित्रंतुला२१७उक्तानु
क्तलात्तयोर्मध्यःतुलाशुक्रस्यमीनोच्चं३१६शुक्रस्यगुरुर्मध्यःतुला११अ

विकृष्टवीर्यः इति एतदाचार्यस्य नाभिप्रेतं॥ यस्मादेतेन स्वल्पजातके
उक्तं तत्काले च दशायबंधुसहजस्वांत्यपुमित्रस्थिता इति॥ अस्य
त्वन्यथा अन्यप्रकारेण ग्रहस्य ग्रहा व्यवस्थिता तत्कालस्य शत्रवो
भवंति॥ अन्योन्यमिति॥ एकराशितः पंचषष्ठसप्ताष्टनवमस्था
नामताश्च तत्कालग्रहस्य ग्रहा भवंति॥ द्वकानुक्त भयानिति पूर्वमे
व प्रदर्शितं द्विपानेक भपान उक्तनुभयांश्च मित्रमध्यस्य शत्रूनेस
र्गिकान् शत्रूमंदसिता विसादिना

9/8